कुसुमाञ्जलिव्याख्याविवृतिः ।

महामहोपाध्याय —श्रीकामाख्यानाथ-तर्कवागीशेन

विरचिता,

श्रीमदुदयनाचार्य्यप्रणीतकारिकया श्रीहरिदासभट्टाचार्य्य

कृतव्याख्यया च सहिता ।

विवृतिकारेणैव संशोधिता प्रकाशिता च ।

द्वितीयसंस्करणम् ।

कलिकाताराजधान्याम्

१९८, मुक्ताराम बाबू ष्ट्रीटस्थ

गोवर्द्धनमेसिनयन्त्रे

श्रीगोवर्द्धनपानेन मुद्रिता ।

शकाब्दा १८२८ ।

मूल्य १॥) टाका मात्र ।

कुसुमाञ्जलिव्याख्याविवृतिः।

महामहोपाध्याय—श्रीकामाख्यानाथ-तर्कवागीशेन

विरचिता,

श्रीमदुदयनाचार्यप्रणीतकारिकया श्रीहरिदासभट्टाचार्य-

कृतव्याख्यया च सहिता।

[illegible] संशोधिता प्रकाशिता च।

द्वितीयसंस्करणम्।



कलिकाताराजधान्याम्

१६१ संख्यक मुक्ताराम-बाबु-ष्ट्रीटस्थ

गोवर्द्धनमेशिनयन्त्रे

श्रीगोवर्द्धनपानेन मुद्रिता।

शकाब्दाः १८२८।

मूल्य १।) टाका मात्र।

विज्ञापनम् ।

परमर्षिकल्पश्रीमदुदयनाचार्य्यमहोदयप्रणीतन्यायकुसुमाञ्जलिकारिकांशस्य या व्याख्या श्रीमता विद्वद्वरेण हरिदासभट्टाचार्य्येण व्यरचि तस्या अतिसंक्षिप्तत्वादन्तरान्तरा अतिदुर्बोधत्वाच्च तया व्याख्यया कारिकाया अनेकार्थतात्पर्य्यं न सुव्यक्तमभवत् अत उक्तहरिदासकृतव्याख्याया विवरणे प्रवृत्तोऽस्मि, कियती कृतकार्य्यता मयाप्रापि तदुवक्तुं न शक्यते। अथवा मादृशजनस्य कृतकार्य्यतायाः सम्भावनापि नास्ति, मन्दमतेर्ममेदृग्दुरूहव्यापारे हस्तक्षेपः केवलं उपहासाय मन्ये । भवतु तावत्, ममेयं विवृतिर्यदि विद्यार्थिनां लेशतोऽप्युपकारसाधिका भवेत् तदाहं सफलश्रमो भविष्यामि। गुणमात्रग्राहिणां विदुषां सविधे सविनयमिदं विनिवेदयामि यत् विद्वद्भिर्ममैतस्या विवृतेर्दोषांश्च परित्यज्य यदि लेशतोपि गुणोवर्त्तते स एव ग्रहीष्यते इति। छात्रश्रमापोदमेता-वद्दुरूहव्यापारे मम प्रवृत्तेर्निदानं। एतद्विवृतिप्रणयने मया टीकात्रयात् साहाय्यं परिप्राप्तं, एका वर्द्धमानकृतटीका, अपरा रामभद्रकृतटीका अपरा च प्रायन्तखण्डितराधामोहनगोस्वामिकृतटीका। स्थानविशेषे उक्तान्यतमटीकाया अंशविशेष अपरिवर्त्तितभावेनैव मया विवृतावुद्धृत । अत्रेदमपि वक्तव्य कुसुमाञ्जलिपुस्तकस्य पुन. संस्करणकाले वार्द्धक्यात् मदीयनेत्रद्वय अत्यन्तहीनप्रभं जातमतो मुद्रितपुस्तकसंशोधनकाले बहुषु स्थानेषु वर्णविपर्य्ययो जात स विपर्य्यय पाठकैरेव सानुकम्प संशोधनीय इति प्रार्थनीयमित्यलमधिकेन।

महामहोपाध्याय—

श्रीकामाख्यानाथ-तर्कवागीश-शर्म्मा ।

शुद्धिपत्रम् ।

पशुद्धम् ।	शुद्धम्	पृष्ठम्	पङ्क्तिः ।
मदीय	मदीयः	१	८
विमुधा	विबुधा	१	१०
निवघ्नाति	निबध्नाति	१	११
भवं	भव	१	१८
विज्ञानो	विज्ञानो	२	४
प्रभुना	प्रभुना	२	११
न्याय	न्याय	२	१२
न्यायः	न्यायः	२	१२
सपचत्वस्य	सपक्षस्य	२	१५
न्यायलक्षणस्य	न्यायलक्षणस्य	२	१७
न्यायः	न्यायः	२	१७
अतिव्याप्ते	अतिव्याप्ते	२	१८
मूलव्याख्यानावसरे	मूलव्याख्यानावसरे	२	१८
नानुपपत्तिः	नानुपपत्ति	२	२२
संयोम	संयोग	२	२५
मुक्तं	मुक्तं	२	२५
साम्येति	साम्येति	३	१०
पदयु	पदयुग	५	५
निरूप्यते	निरूप्यते	५	१०
हेतु	हेतु	५	१०
मद्ग	मद्गु	६	६
अर्गांवर्गयोः	अर्गांपवर्गयोः	६	८

अशुद्धम्	शुद्धम्	पृष्ठम्	पङ्क्तिः ।
धायो	धातो	६	११
भोगस्य	भौगस्य	८	१
जंगत	जगत्	८	१७
समाधते	समाधत्ते	८	२०
न्यायप्रयोज्यो	न्यायप्रयोज्या	८	२०
मूर्तिमपि	धृतिमपि	८	२४

श्रीगणेशाय नमः ।

कुसुमाञ्जली ।

प्रथमस्तवकः ।

इयदीयदनधीतविद्यया तात मातस्सुदमाविवर्द्धयन् ।
विपणाय भव कामजन्मनां कोऽपि गोपतनयो नमस्ते ॥

श्रीमद्गरुडवंश्य विद्यानिधि तनूरुहम् ।
यत्पूजितं महेन्द्राद्यैस्तत्पदं भक्तिभावतः ॥ १ ॥
कुसुमाञ्जलिटीका या हरिदासेन निर्मिता ।
काव्यव्याख्यातृजनों तां विद्वन्तोऽपि यथामति ॥ २ ॥
श्रमो मदीय साफल्यं तदैव भवतादिति ।
सन्तोषाय च मन्वाप्यां ज्ञात्वा विबुधा यदि ॥ ३ ॥

प्रारिप्सितग्रन्थसमाप्तिप्रतिबन्धकविघ्नसमूहविध्वंसनमनसीयाम् ईश्वरनमस्कारं शिष्यशिक्षायै मनसि निबध्नाति, इयदीति, 'इयत्' अल्पकं, ईयत् अन्या बहुतरमिति यावत् 'अनधीता' अनुपदिष्टा ध्रुवं अचेतैव यावत्, ईदृशी या 'विद्या' वाक् तया यद्यपि विद्यामन्दस्य ज्ञानमकृत्वा तथापि आयुष्मानित्याद्यपि जनकानुरूपया वात्सल्यमिति । 'तात मातस्सुदमाविवर्द्धयन्' तातस्य मातुश्च आनन्दं जनयन् 'कोऽपि' अनिर्वचनीयः, गोपनन्दनः श्रीकृष्णः, 'नमस्ते' स्वावधिकोत्कर्षवत्तया आत्मनि स्वावधिकापकर्षवत्तया ज्ञापनस्य नमस्कारपदार्थत्वात् । नमस्कारप्रयोजनमाह भवति अत्र 'यस्मात् निष्पापमित्यन्वयः' इति यावत्, 'कामानि' अदृष्टरूपाणि शुभाशुभकर्माणि, 'जन्म' आद्यन्तो देहेन्द्रियसम्बन्धः तथा 'विपणाय' विनाशाय । केचित्तु 'भवजन्मकर्मणाम्' इति पाठः कल्पयन्त भवे लोके जन्म यस्य तादृशानि यानि शुभाशुभकर्माणि तेषां 'विपणाय' विनाशाय इति व्याचक्षते ।

इष्टदेवतासंकीर्त्तनं ब्रह्मप्रतिपादकसच्छब्दप्रयोगात्मकं मङ्गलञ्च कुर्वन्नेव ग्रन्थनामाह,—

सत्पक्षप्रसरः सतां परिमलप्रोद्बोधबद्धोत्सवो-
विम्लानो न विमर्दनेऽमृतरसप्रस्यन्दमाध्वीकभूः।
ईशस्यैष निवेशितः पदयुगे भृङ्गायमाणं भ्रम-
च्चेतो मे रमयत्वविघ्नमनघो न्यायप्रसूनाञ्जलिः॥१॥

एष अनघ, निर्दोष' न्याय समस्तरूपोपपन्नलिङ्गप्रतिपादकं वाक्यं स एव कुसुमाञ्जलि., मे मम चित्तं रमयतु दु.खासंस्पर्शो-

---

इष्टदेवेति, 'इष्टदेवतायाः' अभिमतदेवतायाः, 'संकीर्तनम्' ईशेति नामोच्चारणं, ब्रह्मेति, "ओं तत् सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः" इत्यादिना सच्छब्दस्य ब्रह्मप्रतिपादकत्व प्रतिपादितम्। ग्रन्थनामाहेति 'ग्रन्थस्य' सन्दर्भस्य, अथवा 'ग्रन्थस्य नाम' [illegible] प्रकरणाद्गम्याख्यानात् चाविधेयं।

न्याय इति नीयते प्राप्यते विवक्षितार्थसिद्धिरनेनेति न्यायः। समस्तरूपोपपन्नेत्यादि, समस्तरूपोपपन्नलिङ्गप्रतिपादकं वाक्यम् [illegible] वाक्यं, न तु समस्तरूपाणि [illegible] विपक्षासत्त्वाबाधितत्वासत्प्रतिपक्षितत्वरूपाणि [illegible] [illegible] तत्प्रतिपादकं वाक्यम् [illegible] "तत्र न समस्तरूपोपपन्नलिङ्गप्रतिपादकं वाक्यं न्यायः [illegible] न्याये" [illegible] [illegible] [illegible] [illegible] "तौ कुसुमाञ्जलि पुमान्" इति कोशात् [illegible] "[illegible]" [illegible] [illegible] [illegible] [illegible] [illegible]

विहीनं करोतु । अनवद्यं शब्ददोषरहितं च, विषयादेः पूर्वोक्तेनैव निरासादिति प्रकाशः । अविघ्नं यथा स्यात् ईशस्य पदयुगे पद्यतेऽनेनेति व्युत्पत्त्या पदं प्रत्यायकं, तद्युगं प्रमाणतर्करूपं, तत्र निवेशित तद्विषयतया उत्पादितः । चेतः कीदृशं भ्रमायमाणं भृङ्ग इव मकरन्दे दुःखविगमोपाये सततं भ्रमत् दुःखविगमोपायमनुसन्दधत् । प्रस्तुताञ्जलिसाम्यमाह, सदित्यादि । सता समीचीनेन पक्षेणानुकूलेन, रविकिरणादिना प्रसरो विकाशो यस्य स तथा, सतां पक्षाणां दलानां विकाशो यत्र स तथेति वा । सतामनुपहतघ्राणानां परिमलस्य गन्धविशेषस्य प्रबोधेन साक्षात्कारेण बकुलस्य आनन्दो येन सः । विमर्दने करपुटविमर्दने न विम्लानः

अ हृदयं मनसो बोधस्य, एतच्च न्यायनये, वेदान्तमते तु यथाश्रुतमेव सम्यक् तन्मते दुःखादीनां मनसो धर्मत्वात् । शब्ददोषरहितत्वमिति शब्ददोषस्य निराकाङ्क्षत्वादिकं, विषयादेरिति विषय चितिः सकर्तृका कार्यत्वादित्यादिन्यायप्रयोगीयदोषविषयः सकर्तृकत्वादि, तस्याऽपि पक्षादावसत्त्वमित्यर्थः । प्रमाणतर्करूपमिति, अत्र प्रमाणं चितिः सकर्तृका कार्यत्वादित्याकारकमनुमानं, तर्कस्तु चित्यादिकं यदि सकर्तृकं न स्यात् तदा कार्यं न स्यादित्याकारकः, अथवा कार्यत्वं यदि सकर्तृकत्वव्यभिचारि स्यात् तदा कारणतावच्छेदकं न स्यात् अतिप्रसक्तधर्मस्यानवच्छेदकत्वात् इत्येव तत्र तर्कः । अतएव सिद्धान्तमुक्तावल्यामुक्तं, "मम तु कर्तृत्वेन कार्यत्वेन कार्यकारणभाव एवानुकूलतर्कः" इति । न चान्वयव्यतिरेकाभ्यां घटत्वावच्छिन्नं प्रति कुलालादित्वेनैव हेतुत्वात् एतादृशकार्यकारणभावे मानाभाव इति वाच्यम् । घटत्वपटत्वादिभिन्नानन्तकार्यकारणभावकल्पनापेक्षया कार्यत्वावच्छिन्नं प्रति कृतित्वेन हेतुत्वकल्पनस्यैवोचितत्वात् यद्विशेषयोरिति न्यायेन कार्यत्वकृतित्वाभ्यां सामान्यकार्यकारणभावस्यावश्यकत्वाच्च । न चैतादृशन्यायेऽनियामक इति वाच्यम् । कार्यत्वावच्छिन्नाभावे तत्तत्कार्याभावकूटस्य प्रयोजकत्वकल्पने गौरवात् कृतित्वावच्छिन्नाभावस्यैकस्य प्रयोजकत्वे लाघवादिति । तद्विषयतया उत्पादित तन्निमित्ततया उत्पादित इत्यर्थः । तथाच न्यायपदे पदद्वय इत्यत्र निविष्टार्थं भवति । ननु व्याप्तिपक्षधर्मताविषयकतया अनुमाने उदाहरणो-

नान्यथाभूतसंस्थान । अमृततुल्यं रसं प्रस्यन्दते इति प्रस्यन्द, एतादृशं माध्वीकं मधु, तस्य भूरुत्पत्तिस्थानम् ।

न्यायपक्षे सति प्रामाणिके पक्षतावच्छेदकविशिष्ट इति यावत्, पक्षे सिषाधयिषितसाध्यके धर्मिणि प्रसृत प्रकर्षेण सदो ज्ञानं यस्मात् । एतेनाश्रयासिद्धिस्वरूपासिद्धिबाधनिरास । मता विवेचकानां परि सर्वतोभावेन मत सम्बन्धो व्याप्ति, तस्या प्रोदोषेण प्रमथा बहु चलव आनन्दो येन, एतेन व्यभिचार व्याप्यत्वासिद्धि विरोधाना निरास । विमर्दने विरोधिप्रमाण

[illegible] निमित्तमिति चेत्, न, [illegible] न्यायस्य निमित्तत्वात् । [illegible] ज्ञानस्य [illegible] प्रति [illegible] तस्य हेतुत्वात् । [illegible] प्रथमम् । [illegible] ईश्वरसाधने [illegible] न स्यात् [illegible] निरास इति चेत्, न, [illegible] इति भावम् । [illegible] ॥ किञ्च [illegible] इति [illegible] ।

चिन्तायां न विवादः न कार्य्याक्षमः, तेन सम्प्रतिपत्तेराहित्यम् । अमूर्त्ते मोक्षः, स च दृश्यमानं, कृतिहित इति न्यायात्, प्रयत्न-घटप्रमानम् । तेन मोक्षस्याप्राप्यता निराकृता । तदेव माध्वीकं, तस्य भूरुत्पत्तिस्थानम् ॥ १ ॥

ननु ईश्वरपदयुनिवेशितस्य न्यायस्य मोक्षरूपफलसम्बन्धे मानाभाव', तत्त्वज्ञानविषयात्मबोधकस्यात्मशब्दस्य संसारनिदान-मिथ्याज्ञानविषयस्यात्ममात्रपरत्वात् तन्मननस्यैव मोक्षोपायत्वात् इति शङ्कायामाह,—

> स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः ।
> यदुपास्तिमसावत्र परमात्मा निरूप्यते ॥ २ ॥

इति सत्प्रतिपक्षमुदाह । प्रकर्षेण व्याप्ता अन्वये व्यतिरेके द्वेधापि यावत् तेन भावाभिधिष्ठ हेतुः । मार्गं हेतोर्निश्चयाद्याह । सर्वत्राविशेषेति अन्वयतो व्यतिरेकतश्चैव, अथवा भवति सपक्षे सवथा विपक्षे चात्यन्ता यो भवति सव्यभिचार इत्यर्थः । व्यभिचारेति प्राचीनैः साध्याप्रसिद्धि साधनाप्रसिद्धौ व्याप्यत्वासिद्धावन्तर्भावात् न तयो पृथगुक्त्याह । विरोधिप्रमाणविन्ताशामिति, विरोधिप्रमाण विपरीतकार्य्यविषयकप्रमिति जनको हेतु तद्भिन्न तद्विषयकं ज्ञान, सत्कार्य्ये सत्प्रयोज्यानुमिति, तदवच्छ तदप्रयोजक, तथाच विरोधिकोटिप्रमापकहेतुविषयकज्ञानकालीन सत्प्रयोज्यानुमित्यप्रयोजकत्वात् यो यो न्याय तत्तदर्थकत्वात् इति समुदितार्थः । कृतिहित इति "कृतिहितो भावो द्रव्यवत् प्रकाशते" इति न्यायादित्यर्थः ॥ १ ॥

ननु ईश्वरेत्यादि, ईश्वरमननस्य मोक्षहेतुत्वे मानाभाव, "आत्मा वा अरे द्रष्टव्य श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इत्यादिश्रुतेः आत्मानाधिकरणत्वानुरोधेन तद्विषयकसाक्षात्कारो मोक्ष हेतुः तद्विषयक मनन मोक्षजनक, साक्षात्कारस्य मिथ्याविषयक, मिथ्याज्ञानध्वंसद्वारा हि तस्य तद्धेतुत्वम् । न चेश्वरगोचरं मिथ्याज्ञानं संसारहेतुः येन ईश्वरगोचरमिथ्याज्ञानध्वंसद्वारा ईश्वरसाक्षात्कारो हेतुर्भवेत् । किन्तु आत्मगोचरं मिथ्याज्ञानमिति तत्साक्षात्कार एव

स्वर्गापवर्गयोः स्वर्गतुल्ययोरपवर्गयोः जीवनमुक्ति-परममुक्त्योः। ईश्वरमननजन्यादृष्टद्वारा स्वात्मसाक्षात्कारद्वारा वा मुक्तौ हेतुः, "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इति श्रुतिस्तत्कारणत्वे मानम्। स्वात्मसाक्षात्कारस्य मोक्षहेतुत्वे मानञ्च "यद्यात्मानं विजानीयादहमस्मीति पूरुषः। किमिच्छन् कस्य कामाय संसारमनुसंसरेत्" । इति ॥ २ ॥

मोक्षहेतुरिति [illegible]। [illegible] स्वर्गेति, अतीन्द्रिय, [illegible] उपायता स्वर्गापवर्गयोः स्वर्गतुल्यापवर्गयोः, जीवन्मुक्ति-परममुक्त्योः [illegible] इति वाक्यार्थः। [illegible] तथापि [illegible]। [illegible] इति [illegible] स्वर्गतुल्यापवर्गयोरिति, [illegible] जीवन्मुक्ति-परममुक्त्योरिति, जीवन्मुक्तिश्च [illegible] इति [illegible], जीवितस्य शरीर-[illegible]। परममुक्तिः [illegible] दुःखनिवृत्तिरिति [illegible]। ईश्वर-मननेति, तथाच "तमेव विदित्वेति श्रुत्या "[illegible] वेदितव्ये [illegible]" इति श्रुत्या च "आत्मा वा अरे" इत्यादि श्रुतिः [illegible], अतएव "[illegible]" इति श्रुतेः [illegible] भवति मोक्षो [illegible] इति श्रुते" [illegible]। [illegible] "[illegible] आत्मसाक्षात्कारोऽपि" इति [illegible]। यद्यात्मानमिति, यदा पुरुषः [illegible] आत्मानं विजानीयादित्यर्थः। किमिच्छन् कस्य कामायेति, [illegible] इत्यर्थः। [illegible] ॥ २ ॥

इह यद्यपि यं कमपि पुरुषार्थमर्थयमाना शुद्ध-बुद्धस्वभाव इत्यौपनिषदाः, आदिविद्वान् सिद्ध इति कापिलाः, क्लेश-कर्म-विपाकाशयैरपरामृष्टो निर्माणकायमधिष्ठाय सम्प्रदायप्रद्योतकोऽनुग्राहकश्चेति पातञ्जलाः, लोक-वेदविरुद्धैरपि निर्लेपः स्वतन्त्रश्चेति महापाशुपताः, शिव इति शैवाः, पुरुषोत्तम इति वैष्णवाः, पितामह इति पौराणिकाः, यज्ञपुरुष इति याज्ञिकाः, सर्वज्ञ इति सौगताः, निरावरण इति दिगम्बराः, उपास्यत्वेन देशित इति मीमांसकाः, लोकव्यवहारसिद्ध इति चार्वाकाः, यावदुक्तोपपन्न इति नैयायिकाः, किं बहुना यं कारवोऽपि विश्वकर्मेत्युपासते, तस्मिन्नेव जाति-गोत्र-प्रवर-चरण-कुलधर्मादिवदासंसारं सुप्रसिद्धानुभवे भगवति भवे सन्देह एव कुतः किं निरूपणीयं, तथापि—

[illegible]

न्यायचर्चेयमीशस्य मननव्यपदेशभाक् ।
उपासनैव क्रियते श्रवणानन्तरागता ॥

श्रुतौ हि भगवान् बहुशः श्रुतिस्मृतीतिहासपुराणादिषु इदानीं मन्तव्यो भवति, "श्रोतव्यो मन्तव्यः" इति श्रुतेः। "आगमेनानुमानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम्" ॥ इति स्मृतेश्च। तदिह सङ्क्षेपतः पञ्चतयी विप्रतिपत्तिः, अलौकिकस्य परलोकसाधनस्याभावात्, अन्यथापि परलोकसाधनानुष्ठान-

---

[illegible]

[illegible]

मस्मरात्, तदभावावेदकप्रमाणसद्भावात्, सत्त्वेऽपि तस्याप्रमाणत्वात्, तत्साधकप्रमाणाभावाच्चेति ॥२॥

१. शुद्धो द्वितीयरहितः। बुद्धो बोधस्वरूपः। आदौ सर्गादौ विद्वान् चिद्रूपः। सिद्धः, षड्विधैश्वर्यवान्। अविद्याऽस्मिता-राग द्वेषाभिनिवेशाः पञ्च क्लेशाः। कर्म धर्माधर्महेतुर्याग हिंसादिः।

विषये, "मनसश्चोपपत्तिमि" इति स्मरणात्। आत्माख्यज्ञमिति, आत्म तत्र प्रत्य यैकतानता तस्य अभ्यास नैरन्तर्य मन एव इच्छा तेनेत्यर्थः। अथवा ज्ञानिकर्मिति आयाम् एव इच्छामात्र, एतादृशेन आत्माख्यातेनेत्यर्थः। जित्वा आसनादिवशेन पूर्वां बुद्धि परमात्मनि प्रकल्प्यतत् तत्र योगम् आत्माख्यात्तत्पारस्य योग अभ्यस्यार्थं ॥

आत्माख्यात्ति व्याचष्टे, शुद्ध इत्यादिना चिद्रूप इति समाधानेन न तु बुद्धेरिव अनात्मिक चैतन्य तस्य इत्यत्र। षड्विधैश्वर्यवानिति, "अणिमा लघिमा प्राप्ति प्राकाम्य महिमा तथा। ईशित्वञ्च वशित्वञ्च तथा कामावसायिता"॥ इत्युक्ताष्टविधैश्वर्य शालित्वं। तथाविधा अणुभाव यत शिलामपि प्रविशति। लघिमा लघुभाव यत सूर्यमरीचिमालम्ब्य सूर्यलोकं याति। महिमा महतो भाव यतो महान् सम्भवति। प्राप्तिरङ्गुल्यग्रेण स्पृशति चन्द्रम्। प्राकाम्यम इच्छानभिघातः यतो भूमावुन्मज्जति निमज्जति यथोदके। ईशित्वं भूतभौतिकेषु प्रभुत्वम। वशित्वं भूतभौतिकं वशी भवत्यवश्यश्चान्येषाम्। कामावसायित्व सत्यसङ्कल्पता यथाय सङ्कल्पो भवति भूतेषु तथैव भूतानि भवन्ति। अविद्या "अनित्याशुचिदुःखानात्मसु नित्य शुचि सुखात्मख्यातिरविद्या" अस्मितेत्यादि, अविद्या अहमिति मतेति चित्तविलास। अभिनिवेश मरणभीतिजनका ज्ञानविशेष। आशयाः कर्माशयाः, जाति जन्म, आयु जीवनकाल, भोग सुख दुःख साक्षात्कार, आशया फलपर्यन्तम् चित्ते शेरते इत्याशया धर्माधर्मा। सम्प्रदाय सम्प्रदीयते गुरुणा शिष्यायेति सम्प्रदायो वेदः। यावदुक्तमिति यावदुक्तेषु सम्प्रदाय प्रवर्तकम् कर्तृत्वादि तेन रूपेण सम्यक् इति मत्वाऽपरमीश्वरो सम्मत। ननु सुखादिना परमात्मत्वमीश्वरस्य सिद्धमात्रप्रवृत्तिविरहात् कथ सम्भव इत्यत आह, शब्दसिद्धत्वोति, अनुमितत्वेति, तथाच ईश्वरानुमिती बुद्धिरूपपक्षधर्मताबलेन सर्वज्ञोपनी सिद्धावधिरूपनियतविशिष्टसिद्धव्यावृत्तिनुमितिप्रतिरोध इति भाव।

क्रियाका जा वायुर्योगा । धर्माधर्मौ आश्रया । निर्माणार्थं कायो निर्माणकाय । सम्प्रदायो वेद । प्रद्योतक इति प्रकाशक, वेदस्य नित्यत्वात्। घटादौ कर्त्तव्ये अनुग्राहक शिक्षयिता। शिष्योनिश्चेतुस्य । पितामह जनकस्यापि जनक । इष्यते इति शेष । सर्वज्ञ अभिज्ञसर्वज्ञ । आवरणमविद्या राग द्वेष मोहा

[illegible]

भिनिवेशः । उपास्यत्वेन देवतोपमत्वादि । यावदुक्तेषु यदुपपन्नं तेनोपपन्न । चरमं शाखा । शास्त्रसिद्धावप्यनुमित्सयानुमितेर्न प्रयासत्वं दोषाय । तुष्यत्विति न्यायेन सम्यगाह, तदि- हेत्यादि ॥ २ ॥

परलोके विप्रतिपत्तिस्तु शरीरजनिकाजनित सुखादृष्टे स्वकालसमानाधिकरणत्वादि न वा इति रूपैः, नरके तु दुःखपदवाची सुखपदमपपात् अपम, तादृशी च जातिः शास्त्रादिकरीर इति वेदवाक्यादिर्वा, अत भावकोटिः नैयायिकानां अभावकोटिः चार्वाकानां शरीरजन्यादृष्टजनि तशरीरजन्यत्वाभावेन शरीरजनितत्वे सुखादृष्टे स्वकालसमानाधिकरणत्वनियमः । परलोकाभावे तु स्वर्गसुखादृष्टोभयजनकशरीरातिरिक्तशरीराभावात् न इति, चैतन्यथा प्रसिद्ध ।

साधने तु कार्यप्रतियोगिक प्रतियोगिक प्रागभावस्य प्रागभाववत्त्वविषयप्रतीतिविषयत्वं न वा इति न तादृशप्रतीतिविषयत्वम् उभयमते प्रागभावत्वं प्रसिद्धम्, अत भावकोटिः नैयायिकानाम् अभावकोटिश्चार्वाकाणां नैयायिकैः कारणत्वमङ्गीक्रियते तत्र कार्यनियत पूर्ववर्तित्वघटितं नियतपूर्ववर्तित्वञ्च प्रागभावघटितम् अत कारणत्वं प्रागभावविषयकप्रतीति विषयः प्रतियोगिक प्रागभावान्यथा, तद्घटितं कार्यप्रतियोगिकं वर्तते इति नैयायिकमतम्, चार्वाकैः कारणत्वानङ्गीकारात् तन्मते कार्यप्रतियोगिकं न कारणत्वमिति, कार्यप्रतियोगिकत्व साधनं परस्पराश्रयत्वं कार्यनिरूपकत्व, प्रतियोगिक प्रागभावान्येन प्रतियोगिक कार्यत्व तत्र प्रागभावप्रतियोगित्वम् अत प्रागभावविषयकप्रतीतिविषयं तदादाय प्रागभाववादाय च सिद्धसाधनवारणाय प्रतियोगिक प्रागभावान्यत्व प्रागभावविषयकप्रतीतिविषयविशेषणम् । न च प्रतियोगिक-प्रागभावान्यप्रागभावविषयकप्रतीतिविषयं घटप्रागभावविशिष्टघटसंयोगप्रागभाव सिद्धसाधनं तादृशघटसंयोगे घटरूपकार्यप्रतियोगिकत्व वर्तमानत्वादिति वाच्यम् । प्रागभाव विषयकप्रतीतिविषयत्वनिवेशेन प्रागभावविषयकप्रतीतिविषयतावच्छेदकरूपावच्छिन्न तावच्छिन्नस्य विवक्षितत्वात् घटरूपकार्यप्रतियोगिकत्वं यत् घटसंयोगप्रागभावे तदवच्छिन्नतावच्छेदकं घटघटसंयोगत्वमेव न तु घटप्रागभावविशिष्टत्व तथात्वे प्रागभावत्वावच्छेदकत्वात् घटघट संयोगत्वं न प्रागभावविषयकप्रतीतिविषयतावच्छेदकमिति स० गुरुमतम् । किन्तु तु

धर्माधर्मात्मकालौकिकपरलोकसाधने विप्रतिपत्तं प्रति तत्साधनं, सिद्धे च तस्मिन् तदधिष्ठातृतया ईश्वरसिद्धिः, अचेतनस्य कारणस्य सचेतनाधिष्ठानेनैव कार्य्यजनकत्वात्। तत्साधनायाह,—

> सापेक्षत्वादनादित्वाद्वैचित्र्याद्विश्ववृत्तितः।
> प्रत्यात्मनियमाद्भुक्तेरस्ति हेतुरलौकिकः॥४॥

अलौकिकोऽतीन्द्रियः परलोकहेतुरस्तीति प्रतिज्ञा। तत्र प्रथमतः कारणसामान्यसाधनायाह सापेक्षत्वादिति। सापेक्षत्वं कादाचित्कत्वं, तथाच कार्य्यं सहेतुकं कादाचित्कत्वात् भोजनजन्यतृप्तिवत्। ननु घटादिहेतोः मृदादेरनित्यत्वे घटादेरपि सदातनत्वापत्तिः, तथाच तस्य कादाचित्कत्वं वाच्यम्, एवं तत्कारणपरम्परापि कादाचित्की सहेतुका वाच्या इत्यनवस्थायामुक्तमनादित्वादिति,

---

अलौकिकेति परलोकसाधनत्वं वर्तते न वा, परलोकसाधने अलौकिकत्वं वर्तते न वेति वा विप्रतिपत्तिः। तथाच कार्य्यकारणभावाभावे न क्षित्यादिकार्य्यं तथा ईश्वरसिद्धिः, परलोकाभावे च तत्साधनयागादिहेत्वभावे तदुपदेष्टृत्वेनापि नेश्वरसिद्धिः, अदृष्टासिद्धौ तदधिष्ठातृतयापि नेश्वरसिद्धिरिति चार्वाकाभिप्रायः। द्वितीयादिविप्रतिपत्तिरीतिस्तु द्वितीयादिस्तबकव्याख्यानावसरे दर्शयिष्यते इति॥१॥

तदधिष्ठातृतयेति। अचेतनकारणजन्यकार्य्यं चेतनप्रयत्नव्यापारजन्यमिति तथाच प्रयोगः, अदृष्टं चेतनाधिष्ठितम् अचेतनत्वे सति कारणत्वात् वेमतुर्य्यादिवदधिष्ठितकुठारवत्। अत्र चेतनाधिष्ठितत्वं चेतनप्रयत्नवदात्मसंयोगवत्त्वम्, सापेक्षत्व मस्यापेक्षया वर्त्तमानत्वं, कादाचित्कत्वमिति फलितार्थः, सहेतुकमिति सहेतुकत्वं व्याप्तिकीर्तनप्रतिज्ञाविशिष्टेन दैशिकत्व सम्बन्धाभावत्व व्यतिरेकप्रयुक्तत्वविशिष्टत्वेनोक्तम् सम्बन्धेन। न च क्षित्यादिकार्य्यमात्रे विशिष्टकारणधर्मावच्छिन्नत्वं कादाचित्कत्वं प्रागभावे व्यभिचारीति वाच्यम्। उत्पत्तिमत्त्वे सतीति विशेषणात्। न च चार्वाकमते साध्याप्रसिद्धिरिति वाच्यम्। क्षित्यादौ सकर्तृकत्व तत्सिद्धौ अदृष्टवत्त्वानुमानात्, अत एव भोजनजन्यतृप्तेर्दृष्टान्तत्वे सौगतादेर्दृष्टान्ते। अनादित्वादिति कार्य्यकारणप्रवाहस्य अनादित्वात् अनादित्वस्य सम्प्रदायोपः

बीजाङ्कुरवत् प्रामाणिकोऽयमनवस्था न दोषायेत्यर्थः । ननु ब्रह्मैव कारणमस्तु किं वा नानाबुद्ध्यात्मिका प्रकृतिरेव तथाऽस्तु इत्यत आह, वैचित्र्यादिति, कार्यं विचित्रकारणवत् विचित्रकार्यत्वात् । ननु दृष्ट यागादेव कारणमस्तु किमदृष्टेन इत्यत आह, विश्ववृत्तेरिति, विशेषा परलोकार्थिना वृत्तिः यागादौ प्रवृत्तिः, स्वर्गादिफलकत्वज्ञानमेव यागादिप्रवृत्तिजनकं, यागादेश्च तज्जनकत्वं तत्कालावस्थायि व्यापारं विना न सम्भवतीति अदृष्टसिद्धिः । नन्वदृष्टं न भोग-समानाधिकरणं किन्तु भोग्यादिनिष्ठत्वेनैव भोगजनकम् इत्यत आह, प्रत्यात्मनियमादिति, भुक्तेर्भोगस्य प्रतिनियतात्मवृत्तित्वात्, व्यधिकरणादृष्टस्य भोगजनकत्वेऽतिप्रसङ्गात् ॥ ४ ॥

अ तथाप्यप्रामाणिकप्रतियोगिकम् । ननु कारणसामग्रीसिद्धावपि कार्यस्य एकम् एकजातीयं वा कारणमस्तु इत्याशङ्कते, वैचित्र्यादिति न च एकस्य ब्रह्मणः नानाबुद्ध्यात्मिकाया प्रकृतेर्वा कारणत्वे कारणवैलक्षण्येन कार्यादिकार्यस्य वैलक्षण्यापत्तिरिति वाच्यम् । वेदान्तमते ब्रह्मणः सत्ताप्रदत्वाद्वा तादृशकारणस्य सार्वत्रिकत्वात् वेदान्तमते कार्यस्य मिथ्यात्वेन तदानुपपत्तेः इत्यभावात् साङ्ख्यमते च कार्यकारणयोरभेदात् कारणभेदात् भेदे कार्यभेदानुपपत्तिरिति वाच्यम् । अतएव प्रकृतिमात्रप्रमाणवादिसाङ्ख्यमते ब्रह्म प्रकृती मात्रेणैव कथं तयो कारणत्वम् इत्याशङ्क्य इति पूर्वपक्षोऽपि निरस्तः । वेदान्तसाङ्ख्यमता-नुयायिनैव साङ्ख्यकारणस्य खण्डितत्वादिति । कार्यं विचित्रकारणवदिति यत्कार्यं घटकारणेति जातीयकारणजन्यं तत्कार्यविजातीयकार्यत्वादित्यर्थः, तथाच हेत्वनुमानेन कार्ये विभिन्नविजा-तीयकारणजन्यत्वस्य सिद्धत्वात् नाभिन्नकारणजन्यत्वं न च एकजातीयकारणजन्यत्वं कार्यजात-स्येति समुदितार्थः । भोगस्य प्रतिनियतात्मवृत्तित्वादिति, भोगस्य सुखादिसाक्षात्कारस्य प्रतिनियतात्मवृत्तित्वात् सर्वेषामनियतत्वात्, तथाच कारणं कार्यसमानाधिकरणं कार्यजनक-माह इति सामान्यव्याप्त्या अदृष्टं भोगसमानाधिकरणं भोगजनकत्वात् इति विशेषव्याप्त्या च अदृष्टस्य भोगसामानाधिकरण्यं सिद्धं न तु भोग्यनिष्ठत्वम् । ननु समवायेन अदृष्टस्य भोग्य-निष्ठत्वेऽपि कालिकसम्बन्धेन भोगसामानाधिकरण्यात् न विरोध इत्यत आह, व्यधिकरणा

अकस्मादेव भवति न किञ्चिदपेक्ष्य कार्य्यमिति, अतएव "अनिमित्ततोभावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात्" इति पूर्वपक्षसूत्रं (न्यायसूत्र ४।१।२२) तत्राह।

हेतु-भूतिनिषेधो न स्वानुपाख्यविधिर्न च।
स्वभाववर्णना नैवमवधेर्नियतत्वतः ॥ ५ ॥

अकस्मादिति किं हेतुनिषेधपरं भवननिषेधपरं वा स्वातिरिक्तहेतुनिषेधपरं पारमार्थिकहेतुनिषेधपरं वा, अलीभयथा हेतुकत्वमलीकहेतुकत्वञ्च पर्य्यवस्यति स्वभावादित्यर्थपरं वा।

र्मिति तथाच [illegible] प्रति [illegible] कारणस्य [illegible] पुरुषान्तरीयभावापत्ति [illegible] कार्य्यं कारणभाव [illegible] कार्य्यं [illegible] कारणभाव प्रसङ्गात् ॥ ४ ॥

[illegible] किञ्चिदपेक्ष्यमिति न [illegible] अनिमित्ततो [illegible] भावोत्पत्तिरिति [illegible] इति [illegible] कण्टकतैक्ष्ण्यादि [illegible] हेतुनिषेध न कारण प्रतिषेध न भूतिनिषेध न भवनप्रतिषेध स्वानुपाख्यविधि [illegible] कार्य्यम् [illegible] स्वभाव [illegible] हेतुत्वम् इति [illegible] यदि [illegible] भवननिषेधोऽय, [illegible] इति [illegible] इति कोपात्

स्वं कार्यम्, अनुपाख्यम् अलीकम् । अवधेर्नियतत्वात, नियतावधिकत्व कार्यदर्शनात् अनियतावधिकत्वे च कादाचित्कत्वव्याकोप इति भाव. ॥ ५ ॥

मन्वनादिरेव कार्यकारणप्रवाहः कादाचित्कत्वान्यथानुपपत्त्या कारणसत्ता वह्नित्वावच्छिन्नस्य तृणादिव्यभिचारितया तृणाद्यकारणत्वे ,कादाचित्कत्वव्याकोप कारणान्तरस्य च वक्तुमशक्यत्वात्। तत्र पञ्चतृणादिसाधारणैकशक्तिमत्त्वेन कारणता शक्तिश्च पदार्थान्तरं प्रसिध्यन्ति नाना अनित्ये अनित्या "नित्ये नित्यैव सा शक्तिः

वस्तुमय निरस्यति हेतुभूतेति। यदि विशिष्ट एव कश्चीदस्मात् हेतुप्रयोज्यमस्माभावो भुज्यते तदा एकविशेषनिषेधस्य विधावपर्यवसानात् पर्युदासतया वा हेतुव्यतिरिक्तस्य भण्यते, हेतुव्यतिरिक्तस्य कार्यस्वरूपम् अलीकस्य तथात्व स्वानुपाख्यविधि रूपा निषेधति लभ्यते, यदि च कादाचित्कम् अत्र अतुल्यार्थस्य व्यवहार तदा अभावादेव कार्यस्य स्वानुपाख्यं हि, तथाह, स्वभावेति। स्वभावतीति हेतु भूतिनिषेधपक्षे स्वानुपाख्यविधिपक्षे कादाचित्कत्वमित्यर्थः , तथाह, स्वभावेति। हेतुनिषेधपक्ष कार्यस्य हेतुनिरपेक्षत्वमर्थ, पक्षद्वय अभिप्रेत्याह, अनपेक्षत्वमिति, हेतुनिषेधपक्ष कार्यस्य हेतुनिरपेक्षत्वमर्थ, प्रतिनिषेधपक्षे कार्यस्य अनुत्पत्तिकत्वमर्थ, अन्वयव्यतिरेकाभिप्रेत्याह, अलीकहेतुकत्वमेवेति, न च अन्ते कार्यहेतुकत्वम् अलीकहेतुकत्व इत्याह अलीकहेतुकत्व पर्यवस्यतीत्युक्ति वक्ष्यति इति वाच्यम्। यत कार्यस्य कार्यपूर्ववर्तित्वावश्यकत्वात् कार्यहेतुत्व न सम्भवति यत. कार्यहेतुत्वकल्पनेऽपि अलीकहेतुकत्वे पर्यवसानम् अत एव पर्यवस्यतीति। अनियता. वधिकत्वे कार्यस्य नियतकालानापत्तेः कादाचित्कत्वव्याकोप पूर्वोक्तकादाचित्कत्वव्याघात इत्यर्थ ॥ ५ ॥

कादाचित्कत्वस्य सहेतुकत्वव्यभिचरिततया न सहेतुकत्वानुमापकत्व सम्भवति इत्याशङ्का निराकरोति, मन्वनादिरेवेत्यादिना ननु वह्नेः तृणान्वितवत्त्वा कथ तदन्वयभावेन कादा चित्कत्वं सहेतुकत्वव्यभिचारि इत्यत आह, वह्नित्वावच्छिन्नस्येति तृणसमवधान विनापि मण्यादिसमवधानात् मण्यादिसमवधान विनापि तृणसमवधानात् वह्न्युत्पत्ते न तृणादिकं वह्निकारणम्। ननु तृणादि कारणत्वाभावेऽपि तृणादिभिन्न वह्निकारणमस्तु इत्यत आह,

निर्त्ये भावहेतुता इति तत्सिद्धान्तात्। वह्न्यनुकूला तृणारणिमणिनिष्ठा शक्तिर्नित्येति तु मतान्तरम्। न्यायमतन्तु तृणादित्वावच्छेदक वैजात्यमेव विजातीयेष्वेकजातीयकार्य्यानुकूलशक्तिकल्पने धूमादिना वह्न्यनुमानं न स्यात् न स्याच्च तृणफुत्कारसमवधानस्य निर्मन्थनारणिसमवधानस्य प्रतिफलितरविकिरणमणिसमवधानस्य च प्रतिनियत कारणतावच्छेदकावच्छिन्नस्यैव कारणतावच्छेदकान्तरावच्छिन्नसमवधाने कार्य्यजननस्य दृष्टत्वात् फुत्कारमणिसम्बन्धादिनाऽपि वह्न्यापत्ते। यदि च तृणफुत्कारादिसम्बन्धादिषु वह्न्यनुकूला एका शक्तिः कल्प्यते तदा नैतत् समाधानं परन्तु तार्णवह्न्यादिनिष्ठ वैजात्यं प्रत्यक्षसिद्धं दीपत्वादिवदिति न पदार्थान्तरशक्तिकल्पनम्। अमुमर्थमाह —

[illegible]

प्रवाहो नादिमानेष न विजात्येकशक्तिमान् ।
तत्त्वे यत्नवता भाव्यमन्वय-व्यतिरेकयोः ॥६॥

एष कार्य्यकारणप्रवाहः नादिमान् अनादिः । विजातीयेषु तृणादिषु एकशक्तिमान् न प्रवाहः । अन्वयव्यतिरेकयोस्तत्त्वे नियतत्त्वे निर्णये यत्नवता भाव्यं यत्नः करणीयः । वैजात्यं कल्पनीयमिति भावः । वह्निसामान्यं प्रति तु विजातीयोऽप्यनुगतशक्तिरेव कारणम् ॥ ६ ॥

तदवच्छिन्नत्वकार्यताया फुत्कारादिजन्यतावच्छेदकतया [illegible] सह कारितया फुत्कारं सहकारिणं मण्यादिकोऽपि [illegible] भावः । दीपत्वादिरिवेति यथा दीपत्वम् आलोकविशेषजनकतावच्छेदकं वैजात्यं प्रत्यासन्नं तथा तृणत्वादिकमपि वह्न्यादिजनकतावच्छेदकं विजातीयवैजात्यं प्रत्यक्षसिद्धमिति । न पदार्थान्तरशक्तिकल्पनमिति तथाच कारणतावच्छेदकतिरिक्तशक्तिकल्पने मानाभावमिति भावः । अनुमदेवात इति अनुमत्र्यभिप्रायः इत्यर्थः ।

कार्य्यकारणप्रवाह इति कार्य्याणां कारणानाञ्च प्रवाहः इत्यर्थः, न आदिमान् न आदिमान् न कैवलधीनकार्य्यकालीन इति यावत् तथाच कार्य्यमात्रं सहेतुकं न तु किमपि यदृच्छिकार्य्यम् अहेतुकमिति यदृच्छा कार्य्यमिथुनक्त न तत्तुल्यत्वमभिचारि न वा कार्यान्तरवद्वैहिन सहेतुकत्वसाधने यदृच्छावादिनः सिद्धसाधनमिति भावः । विजातीयेष्विति कारिकांशविरुद्धतिपदार्थे, एकशक्तिमानिति विजातीयतृणादिनिष्ठैकशक्त्यवच्छिन्नकारणताशून्य इत्यर्थः । ननु कथं तत्तुल्यव्यभिचारवारणमित्यत आह कारिकायां तत्त्व इति व्याख्यातम् अन्वयव्यतिरेकयोर्नियतत्व इति तथाऽप्यन्वयव्यतिरेकयोः तथाऽन्वयव्यतिरेकनियमस्य इत्यर्थः, वैजात्यं कल्पनीयमिति तथाच तृणादिजन्यतावच्छेदकत्वेन वह्न्यादिनिष्ठतादृशवैजात्य कल्पयित्वा तेनैव तृणादिजन्यतावच्छेदकधर्मावच्छिन्नं कल्पनीयत्वात् न तत्तुल्यव्यभिचार इति भावः । ननु तत्तज्जन्यतावच्छिन्नं प्रति तृणादेः कारणत्वेऽपि वह्निमात्रं प्रति किंमत्तया कारणत्वं स्यादित्यत्र कारणतावच्छेदकैकधर्म्मकल्पनीयत्वाभावादाह वह्निसामान्यं प्रति त्विति ॥ ६ ॥

ननु यथा एक एव दीपः आलोककारी वर्त्तिविकारकारी घटादि प्रकाशकारी च तथा एकमेव ब्रह्म किं वा कार्यकारणयोरभेदात् प्रतिपुरुषं विभिन्नबुद्धेरभिन्ना प्रकृतिरेव हेतुरस्तु तथाच नादृष्टाधिष्ठातृतयेश्वरसिद्धिरित्यत आह,

एकस्य न क्रमः क्वापि वैचित्र्यञ्च समस्य न।
शक्तिभेदो न चाभिन्नः स्वभावो दुरतिक्रमः ॥७॥

एकस्य कारणस्य नियम्यो न कार्याणां क्रमः समस्य एकजातीयकारणस्य प्रयोज्यञ्च न कार्याणां वैचित्र्यं वैजात्यं, तथाच क्रमिककार्यनिर्वाहकतया क्रमिककारणसिद्धिः विजातीयकार्यजनकतया च विचित्रहेतुसिद्धिरित्यर्थः। शक्तिभेदादेव सजातीयादेकस्मात् कार्यवैजात्यम् इति शङ्कां निराकुरुते शक्तिभेदो न

ननु कार्याणां क्रमिकत्वं न क्रमिककारणसाधकं तथा कार्यवैचित्र्यमपि न विचित्रकारणकल्पनासाधकम्, आलोकवर्त्तिविकारघटादिप्रकाशन विचित्रेषु च एकस्यैव दीपस्य हेतुत्वव्यभिचारादिति बाधकात् तेन सकलकार्येषु एकहेतुकत्वं विजातीयकार्येषु च [illegible] एकमेव ब्रह्म वि[illegible]मनुमानम्, अभिन्ना प्रकृतिरेव वा [illegible]मनुमानम्, एवं एकजातीयकारणकत्वम्। कार्यमाने पुरुषाणां भेदात् प्रतिपुरुषञ्च [illegible] बुद्धीनां भेदेऽपि प्रकृतिविकारत्वात् प्रकृतेरेकत्वात् एकजातीयत्वम् नादृष्टाधिष्ठातृतयेति न च [illegible] अदृष्टस्य नियम्यत्वेन कल्पनात् सिद्धिरिति [illegible] [illegible] तिति।

कारिकार्थस्तु एकस्मात् [illegible] नियम्यत्वं क्वापि क्रमः कार्ये क्रमः क्रमिकत्वं न एकस्य न एककारणजन्यस्य [illegible]। कार्याणां क्रम इति क्रमः क्रमिकत्वम् [illegible] एककारणजन्यत्वे [illegible] कार्यान्तरस्य [illegible] तथाच [illegible] [illegible] [illegible] [illegible] [illegible] कार्यस्य [illegible] [illegible] [illegible] कार्याणां वैचित्र्यमिति स्यात् [illegible]

चाभिन्न इति। द्वयो र्हेतो, न शक्तिभेदः अभिन्नो यत, शक्ति-शक्तिमतोरभेदात्. भेदे च तस्यैव कारणत्वस्वीकारे एकमात्रकारणत्वभङ्ग प्रसङ्गो हेत्वन्तरसिद्धेरित्यर्थः। ननु स्वभावादेव एककारणस्य विचित्रकार्यनिर्वाहकत्वम् इत्यत्राह, स्वभावो दुरतिक्रम इति। एकस्मिन् कार्ये जनयितव्ये यः स्वभावः कार्यान्तरजननकाले तस्यानुवृत्तौ दहनस्यापि जलादित्वं स्यात् स्वभावस्य दुरपह्नवत्वादित्यर्थः, प्रदीप स्यापि तत्तत्कार्यसामग्रीभेदकल्पनादिति भावः ॥ ७ ॥

ननु दृष्टादिर्घटादौ हेतुरस्तु न तु यागादिः स्वर्गादिहेतुरित्यत्राह।

विफला विश्ववृत्तिर्नो न दुःखैकफलापि वा।
दृष्टलाभफला वापि (१) विप्रलम्भोऽपि नेदृशः ॥८॥

विशेषां परलोकार्थिनां स्वर्गाद्यर्थं यागादौ प्रवृत्तिर्विफला न, न वा दुःखमात्रफलिका, प्रवृत्तेरिष्टसाधनताधीसाध्यत्वात्। न च

कारणगतानागतीयकारणतावच्छ्य स्यात् तदा घटविजातीयो न स्यादित्यवतिरेक कार्यमात्रस्य एकजातीयकारणजन्यत्वे बाधकेति भावः। एकजातीयादेकस्मादिति, "एकजातीयादिति साध्यजनताभिप्रायेण, एकस्मादिति वैशाचमताभिप्रायेण, न शक्तिभेद इति शक्तिवादि नियामक इति शेषः। अभिन्नो यत इति धर्माभिन्नो यत इत्यर्थः। ननु स्वभावाद्वेति, पूर्वं कार्यस्य स्वीयस्वभावाधीनत्वं दूषितम् इदानीम् एककारणस्यस्वभावादनेकस्येति भावः। दहनस्यापि जलादित्व स्यादिति एकस्मिन् कार्ये यस्य स्वभावस्य जनकत्वं कार्यान्तरेऽपि तस्यैव जनकत्वं वाच्यम् अन्यथा एकस्य स्वभावभेदादेकत्वादिव्याघातः इति तत्स्वभाव-जन्यत्वेन विजातीयकार्योत्पादसामर्थ्यं स्यादित्यर्थः। दुरपह्नवत्वादिति दुष्परिहार्यत्वादित्यर्थः। तत्तत्कार्यसामग्रीभेदेति [illegible] कल्पनादित्यर्थः। अन्यथा आलोका दीनां युगपदुत्पत्तिरिति ॥ ७ ॥

(१) दृष्टलाभफला नापि इति क्वचित् पुस्तकस्य पाठः, स एव समीचीनः।

दृष्टलाभफला पूजा ख्याति धनादिफला तन्निरपेक्षैरपि तदाचरणात्। कश्चित् प्रतारकेण स्वर्गादिफलकतया यागादिकं प्रकल्प्य स्वयमनुष्ठाय धन्धितो लोकः प्रवर्त्तते इत्यत्राह, विप्रलम्भोऽपि नेष्ट इति क एव लोकोत्तरो यः परप्रतारणार्थं नानाविधक्लेशहेतुकर्मभिरात्मानमवसादयेत्। तथाच यागादिप्रवृत्तिरेव स्वर्गादिफलकत्वे यागादेर्मानमिति ॥ ८ ॥

ननु यागादिकं स्वर्गादिहेतुरस्तु न तु तज्जन्यादृष्टं तथेत्यत आह,—

चिरध्वस्तं फलायालं न कर्मातिशयं विना।
सम्भोगो निर्विशेषाणां न भूतैः संस्कृतैरपि ॥९॥

चिरध्वस्तं यागादि कर्म्म अतिशयं तत्फलानुकूलव्यापारं विना फलाय न अलं न समर्थं चिरध्वस्तकारणस्य व्यापारद्वारैव हेतुत्वं यथा अनुभवस्य संस्कारद्वारकस्य स्मृतौ। ननु भोग्यनिष्ठमदृष्ट

[illegible] ॥ ८ ॥

[illegible] ॥ ९ ॥

कारणमत्र इति जिज्ञासायामाह, सम्भोग इति, निर्विशेषाणाम् अदृष्टरूपगुणशून्यानाम् आत्मनां सम्भोगः प्रत्यात्मनियतो भोगः, सम्भूतेरपि अदृष्टवत्तया स्वीकृतेरपि भूतैर्न स्यात्, भूतानां शरीरादीनां सर्वात्मसाधारणत्वात् तददृष्टादृष्टैरेव शरीरेन्द्रियादिभिः सद्भोगजननादित्यर्थः ॥ ८ ॥

ननु भोग्यादिनिष्ठ एव धर्मविशेषोऽतीन्द्रियः प्रतिनियतभोगादिं

जनकत्वात् भूतिगतस्तादृशवस्तुनि। ननु यावद्गुणेष्वेव प्रति शरीरेन्द्रिय-सम्बन्धा-दिविशिष्टा चतुर्णां नियमाय नेतु यावदन्यसम्बन्धविशेषे भोग्यत्वनियामकत्वे दृष्टतया अनन्यगतीकाप्य तस्यैव सर्वैकजनकत्वमभ्युपेत्य यावदात्मविशेषत्वम् स्वीकर्तव्यतः इति, नन्विति सम्भोग इतीत्यः, तथाच यावदात्माऽदृष्टवत्त्वेन अनुगतेन प्रत्यात्मनियतभोगा नुपपत्तिरिति भावः। तत्र चतुर्णाम् सर्वात्मसाधारणत्वादिति वाच्यम् सर्वमूर्तसंयोगात् भोगित्वम् शरीरादीनां तत्तत्कारणत्वादित्यर्थः। तथाच अदृष्टस्य भोग्यनिष्ठत्वे भोग प्रति स्वाश्रयसंयुक्तत्वसम्बन्धेन अदृष्टकारणत्वं वाच्यम्। पुरुषान्तरकर्मजन्यादृष्टस्य पुरुषान्तर भोगापत्तिरिति भावः। न च तत्पुरुषीयत्वं प्रति तत्पुरुषीयस्वाश्रयत्वादृष्ट इत्यादि विशिष्य कार्यकारणभावात् न तदापत्तिरिति वाच्यम्। पुरुषविशेषसम्बन्धाप्य अनन्त कार्यकारणभावकल्पनापेक्षया समवायप्रत्यासत्त्या भोगादृष्टयोः कार्यकारण भावस्य लघुत्वात्। ननु भोग्यनिष्ठादृष्टं विना कथं भोग्यविशेष इत्यत आह तत् दृष्टादृष्टैरवेति, तथाच तत्पुरुषीयादृष्टजन्यशरीरादिभोगं प्रति स्वजनकादृष्टवत्त्वसम्बन्धेन भूतानां हेतुत्वात् भोग्यविशेषनियमोपपत्तिरिति भावः। न च भोग्यनिष्ठादृष्टस्य "यथा सम्भिन्नसदृशे" इत्यनेन पूर्वमेव निरस्तत्वात् "सम्भोगो निर्विशेषाणाम्" इत्यस्य पौनरुक्त्य मिति वाच्यम्। "सम्भोगो निर्विशेषाणाम्" इत्यादि प्रागुक्तस्यैव विवरणत्वेन पौनरुक्त्य सम्भवात्। न अदृष्टस्य भोग्यनिष्ठत्वेऽपि अदृष्टाधिष्ठातृतया ईश्वरसिद्धिप्रसङ्गात् अदृष्टस्य आत्मनिष्ठत्वसाधनमयुक्तमिति वाच्यम्। अदृष्टाधिष्ठातृतया ईश्वरसिद्धि तदादृष्टस्य आत्मनिष्ठत्वम्, न भोग्यनिष्ठत्वमिति वस्तुस्थितिमनुरुध्य अदृष्टस्य आत्मनिष्ठत्व साधनादिति ॥ ८ ॥

ननु अदृष्टं दाहादुपकारकत्वेन भोगसाधनवनितादिशरीरे भोगजनकतावच्छेदिका

नियामकोऽस्तु यथा दाहादिनियामका वह्न्यादिनिष्ठ शक्तिभेद अन्यथा तादृशादेव करतलानलसंयोगात् सति प्रतिबन्धके दाह पत्ते। न च मण्याद्यभाव एव कारणमस्त्विति वाच्यम्। कारण स्य भावत्वव्याप्तत्वात् किन्तु शक्तिनाशं करोतीति मण्यादि प्रति बन्धक उच्यते तथाच शक्तिः स्वीकार्या इत्यत आह।

भावो यथा तथाऽभावः कारणं कार्य्यवन्मतः।
प्रतिबन्धो विसामग्री तद्धेतुः प्रतिबन्धकः॥ १०॥

यथाऽन्वयव्यतिरेकाभ्यां भावो ध्वंस कार्य्यं तथाऽभाव कारणमपि कारणत्व भावत्वव्याप्यमित्यस्याप्रयोजकत्वात्। यत्कि ञ्चित्करस्य प्रतिबन्धकत्वानुपपत्तिरित्यत आह प्रतिबन्ध इति विसा

शक्ति [illegible] कारणात् [illegible] [illegible] इति [illegible] [illegible] [illegible] [illegible] इति [illegible]। [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible] इति [illegible] भाव।

[illegible] भावो यद्वत् यथा [illegible] [illegible] [illegible] वाच्यम्, भाव कार्य्यं तथा [illegible] कारणम्। ननु कारणत्व भाव

मणौ कारणाभावः, न च प्रकृते मण्याद्यभावस्याभावो मण्यादि तत्समवधानहेतुः पुरुष एव प्रतिबन्धकः, स्वार्थे कप्रत्ययेन च मण्यादौ प्रतिबन्धकपदप्रयोग इति भावः। मीमांसकास्तु उत्तेजकाभावकूट-विशिष्टमण्यभावत्वेन हेतुत्वे गौरवात् लाघवाच्छक्तिर्नित्या वह्न्यादौ कल्प्यते। प्रतिबन्धे सति शक्तिकुण्ठनम्। यत्तु शक्तिः प्रथमतो वह्निकारणजन्या वह्निनिष्ठा, प्रतिबन्धकेन च तस्या विनाशे उत्ते-जकेन च पुनर्जननम्। न च शक्तेरनियतहेतुकत्वम् इति वाच्यम्। प्रश्यनुकूलशक्तिमत्त्वेन कारणत्वादिति, तन्न, वह्निनिष्ठनानाशक्ति-कल्पनापेक्षया उत्तेजकाभावविशिष्टमण्यभावस्यैकस्यैव वरं हेतुत्वौ-चित्यात्। तथा चाकुण्ठितशक्तिरेव तत्र कारणतावच्छेदिका कल्प्यते

तद्व्याप्यत्वमिति निष्कर्षे व्यभिचार इत्यत आह कार्यवदिति, यथा अदृष्टाभावस्य विशिष्टनियतोत्पत्तिकत्वेन किञ्चिद्वस्तुकार्यत्वं तथा अभावस्य किञ्चिद्वस्तुनियत-पूर्ववर्तित्वेन किञ्चिद्वस्तुकारणत्वं, तावता कारणत्वाभावाप्ते तुल्ययुक्त्या कार्यत्वस्याप्यत्व अपि स्यात् इति भावः। ननु मण्याद्यभावस्य कारणत्वे सिद्धे मण्यादि प्रतिबन्धकत्व मतस्य वाच्ये तत्र मण्यादौ कथं सम्भवति, शक्तिपूर्वकत्वस्थानुकूलत्वसंविशिष्टाभावप्रत्य-सिद्धप्रतिबन्धकपदेन प्रतिबन्धकत्वं तदीयमान् कथेतरे शक्तिचित्कुण्ठन मण्यादौ तद्-व्यवहारादित्यादि, व्याख्यातम् शक्तिविघटकत्वात्। प्रतिबन्धकपदप्रयोग इति, तथा च प्रतिबन्धकत्वं दाहहेतुभूतपुरुष एव, प्रतिबन्धकपदस्य मुख्यप्रयोग इति भावः। एवञ्च वह्न्यादिनिष्ठदाहानुकूलातिरिक्तशक्तिपदवाच्यासिद्धा वाक्यानुमानेन आगमसिद्धादृष्ट-सिद्धिरिति तात्पर्यम्। न च धर्मसदृशपदार्थ शौचादिनिष्ठत्व कथं स्यात् आगमात् भाग-साधनत्वमिति वाच्यम्। यथा यज्ञादि वैशिष्ट्येनैव दाहादिहेतुत्वा तथा भोगशरी-रादीनामदृष्टसम्बन्धातच्छेदकत्वेनाप्यादिनैव स्वत्वात्। न चापन एवादृष्टं न तु भोगादिविशेष कि विनियमकमिति वाच्यम्। यज्ञनाशेऽपि निष्ठानन्तादृष्टकल्पनापेक्षया एतात्मनिष्ठादृष्टकल्पनस्यैव लघुत्वात्। उत्तेजकाभावकूटत्यादि, तथा च तत्त्व प्रतिबन्धक-तावच्छेदकीभूताभावप्रतियोगित्वं, मणीत्वाद्यभावविशिष्टत्वे प्रतिबन्धकत्वेन इति तावच्छेदकीभूताभावप्रतियोगितो मण्यत्वाद्यवच्छेदकत्वम्। शक्तिकुण्ठनमिति,

इत्याहुः। तन्न, शक्तिकुण्ठने प्रतिबन्धकस्य हेतुत्वमुत्तेजकस्य कुण्ठितत्वविनाशकत्वमित्याद्यनन्तशक्तिकल्पनापत्तेरिति दिक्॥ १०॥

नन्वु व्रीहीन् प्रोक्षति" "व्रीहीनवहन्ति" इत्यत्र प्रोक्षणजन्यकालान्तरभाव्यवघातजनको व्यापारो व्रीहिनिष्ठ आवश्यकः, 'प्रोक्षिता एव व्रीहयोऽवघाताय कल्पन्ते" इति वाक्यशेषात्। किञ्च यो यदुत्पत्तावुद्दिश्य क्रियते स तन्निष्ठफलजनकव्यापारजनकः यागवत्। किञ्च व्रीह्यादीनामापरमाण्वन्तभङ्गे व्रीह्यादिनियमानुपपत्तिः। एवं मार्जनप्रोक्षणादिना भूमिनिष्ठा अतिशयरूपा शक्तिर्वाच्या।

अत्रोच्यते।

2)

कुण्ठन [illegible] मीमांसकमत शक्तिनिष्ठ [illegible] मीमांसक [illegible] कल्पना [illegible] [illegible] इत्याहुः [illegible] ॥ १०॥

मीमांसकः पुनः [illegible] प्रोक्षणजन्य [illegible] व्रीहिनिष्ठो [illegible] इति [illegible] व्रीहिनिष्ठमिति [illegible] "[illegible]" इति [illegible]

संस्कारः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिभिः ।
स्वगुणाः परमाणूनां विशेषाः पाकजादयः ॥ ११ ॥

प्रोक्षणादिभिः संस्कारोऽदृष्टं पुंस पुंसि इष्टं स्वीकृतं, प्रतिव्रीहि नानाशक्तिकल्पनापेक्षया एकस्यैवादृष्टस्यात्मनिष्ठस्य प्रोक्षणादिजन्यावघातजनकस्य लाघवेन कल्पनात् दृष्टद्वाराभावे सति चिरध्वस्तस्य कालान्तरभाविफलानुकूलस्य धर्मजनकत्वकल्पनाच्च । संस्कृतो व्रीहिरिति प्रत्ययबलाच्च तस्य स्वरूपसम्बन्धेनैव व्रीहिनिष्ठत्वं कल्प्यते एतेनाभिमन्त्रितपयःपानादावपि तत्तत्फलानुकूलमदृष्टं पुरुषनिष्ठम् । व्रीहीनिति च शक्तून् प्रोक्षति इत्यादावपि प्रोक्षणादिजन्यजलसंयोगादिरूपपरसमवेतक्रियाजन्यफलशालितया कर्मता । यो यज्ञफलार्थितया क्रियते स तन्निष्ठफलजनकव्यापारजनक इति च धातुनिष्ठधात्वर्थक्रियमाणस्नानादौ स्वनिष्ठफलजनके व्यभि

शुध्यति चकार्थे च व्रीह्यादिपरत्वात्तत्र यत्नान्तरत्वात्तत्र च पृथक् पृथक् शक्तिः स्वीकार्या नैव व्रीह्यादिनिष्ठातिशयेऽति भावः । दोषान्तरमाह एकव्रतादि तथाच भावकारणं शक्त्यातिशयसम्बन्धिका शक्तिसमाधेव स्वीकार्येति भावः । एवञ्च शक्तिसिद्धौ तदुच्छेदेन न भोगश्च न कालान्तरभाविफलहेतुत्वमिति पूर्वपक्षाशयः ।

* प्रोक्षणादिजन्यातिशयविरहाभावे तस्य व्रीहिनिष्ठत्वं न विहायोगिवत्‍ वारिकायां संस्कार इति प्रोक्षणाभ्युक्षणादिभिरिति प्रोक्षणाभ्युक्षण जन्य शुद्धस्य शुद्धत्वविषयापि कालान्तरभाविफलजनके तयाच कृति उपादानेन च प्रोक्षणं परिकीर्तितम् । अथवा अभ्युक्ष्य प्रोक्ष्य तिरश्चीनेन कुर्वीत ॥ व्याख्यायाम् एकस्यैवादृष्टस्येति एकत्वेनैव भावकर्मणि इष्टिनं तथाच कालान्तरभाविफलानुकूलो व्यापारो व्यापारेण एक एव सिद्ध तस्य व्रीहिनिष्ठत्वं प्रत्येकव्रीहिनाशात् तन्नाशे फलानुत्पत्तिः न च कालान्तरस्थत्वात् तत्र कालान्तरस्थायित्वात् तस्य तत्वात् । चिर ध्वस्तस्य प्रतिबन्धकोऽप्यत एवा दृष्टविषय तथा यागादौ इति सिद्धम् । दृष्टद्वाराभावे सतीति दृष्टाभावे सतीत्यर्थः, भोजनादौ व्यभिचारवारणाय एतद्विशेषणस्य सार्थक्यम् । यागादाव प्रयोग भोजनम् अदृष्टजनकं दृष्टद्वारकत्वं सति कालान्तरभाविफलजनकतया सिद्धिमत्वात् शक्यवदिति ।

चारि। यथाद्युत्पत्तिनियमार्थमाह स्वगुणाः परमाणूनां पाकजादयो विशेषा विशेषकाः, तेन पाकजरूप-रसादिविशिष्टाः परमाणवस्तत्कार्यमारभन्ते। चिकित्साशास्त्रे तु धातुसाम्यमेव भेषजपानस्य रोगादिनाशे फले जनयितव्ये द्वारमिति भावः ॥ ११ ॥

ननु [illegible] इत्यत आह, सतीति [illegible] इत्यर्थः, [illegible] नेति [illegible] नेत्यर्थः । केचित्तु [illegible] नेत्यर्थं, तौलितु [illegible] इति [illegible] तत्र वर्तते परीत्याह । ननु तथापि अभि[illegible] इत्यत आह, एतेनेति [illegible] 'सती'त्यादियुक्तिगणेनेत्यर्थः । अभिमन्त्रितेति, अभिमन्त्रितस्य [illegible], अभिमन्त्र[illegible] संस्कारविशेष[illegible], [illegible] । न च [illegible] न [illegible] इति वाच्यम् । [illegible] स्वकर्त्रं न [illegible] । [illegible] कर्त्तृ 'कर्मत्वं', [illegible] कर्मत्वप्रत्याय । [illegible] न [illegible] इत्यर्थः, [illegible] कर्मत्वाभावात् । यथा मनुष्य [illegible] इति [illegible] तथा [illegible] न [illegible] । यो [illegible] इति [illegible] न च [illegible] इति वाच्यम् । "[illegible]" [illegible] इति [illegible] वाच्यम् । [illegible] तत्र [illegible]

ननु यत्र पाकजोन विशेषस्तत्र वाय्वादौ कथमुद्भूतस्पर्शादि, करकादौ च प्रतिहतं द्रवत्वमिति, कथञ्च प्रतिमादौ प्रतिष्ठादेरुप योग., तथाच प्रतिष्ठाजन्या अग्निशाण्डालादिस्पर्शनाश्या पूज्यता॥ प्रयोजिका श्लोकार्थो इत्यत आह,—

निमित्तभेदसंसर्गादुद्भवानुद्भवादयः।
देवताः सन्निधानेन प्रत्यभिज्ञानतोऽपि वा ॥१२॥

निमित्तभेद अदृष्टभेद, देवता प्रतिष्ठाविधिना सन्निधानेनाह ङ्कार ममकारादिना आराधनीयतामापादयन्ति, प्रतिष्ठाविधिना

भावाभावप्रमाणात्। तत्तुल्यावमिति धार्तक विश्वनाथ वाल पितृ वक्तः तेषां सत्त्व विकार निहन्ति। एव भावकर्मणादिनापि न ययाजन्मनि विना कथंचन पुरुषमिलाप मदी। कदाचनाच चिन्तयत्वा मुनिर्न्नवती, पदपदनिर्देश्यतादवीश्वम् ॥ ११ ॥

ननि धिवाय्वादौ अद्भुतस्पर्शादि भावः किम न, ननि किम् तथै करकादौ द्रवत्वमनि याद न सर्वत्र इत्यादौ अनिरेव निमित्तविशेष कस्य श्रीयाम्या, एव प्रतिमादौ प्रतिष्ठा विधिना पूज्यताश्लोकस्य अनिरेव कारणा इति भीमांसकः प्रकृते मन्निमयविन। कारि काया निमित्तभेदसंसर्गादिति अदृष्टविशेषसहायमगीकादिरर्थः। तत्राद्भुतत्वादय अनि तत्र अद्भुतस्पर्शादि, अनुद्भव अनुद्भूतस्पर्शादि, आदिपदात् प्रतिबद्धद्रवत्वपरिग्रह। तथाच अद्भुतस्पर्शादिक अतृप्तपुरुषभोगजनकं तत्रैवाद्भुतत्वमिति भाव। आराधनी यतामिति प्रतिपाद्य इति शेष। आराधनीयत्वञ्च देवमीतिहेतुक्रियाधारत्वं देवत्वञ्च मन्त्रबोधितमन्त्रक्रदयकक्रयाधीनैश्वरत्वम्। तेविष् देवानां जन्यधीत्वाभावात् मौरवज्ञान जन्यधीविषयपीयोग्यत्वया आराधनापदस्य कर्मत्वञ्च भौरवप्राप्तविषयत्वम् इत्याह। तत्र। अशरीरस्य परमेश्वरस्य जन्यज्ञान जन्यधीत्वाद्यभावेऽपि प्रतिमादौ पूजनीयस्य शरीरिणो विष्णुदेवताममत्वे बाधकाभावात्। अतएव मन्दशक्तिप्रकाशिकायां जन दीपनकामद्वारेण विष्णु पूजनेऽद्यादौ भीतायनसम्य बाधकतृमम्। एतेन परमेश स्य जन्यज्ञानाभावात् आहार्ज्ञानस्योरहङ्कारममकारयो बाध तत्र सम्भव इति पूर्वपक्षोऽपि निरस्तः। अशरीरस्य परमेश्वरस्य जन्यज्ञानाभावेऽपि शरीरिणो विष्ण्वादे आहार्यजन्यज्ञानसम्भवात्। अहङ्कार-ममकारादिनेति सन्निधानेनेत्यस्य विवरणं यद्यपि

देवतानां प्रतिमादौ अहङ्कार ममकारौ, चाण्डालादिस्पर्शे च तादृशाभिमानाभावः। देवतार्चनव्यवहारेऽपि यथार्थपूजितत्वधीः प्रतिष्ठितत्वधीश्च चाण्डालादिस्पर्शाद्यभावविशिष्टा पूज्यतानियामिका, तत्र चोपयोगिनी प्रतिष्ठा। वस्तुतस्तु प्रतिष्ठाकालीनयावदस्पृश्यस्पर्शनादिसंसर्गाभावः प्रतिष्ठाध्वंसकालीनः पूज्यताप्रयोजकः "प्रतिष्ठितं प्रपूजयेदिति" ज्ञेन प्रतिष्ठाध्वंसस्यैव प्राप्तेरिति दिक् ॥ १२ ॥

पूजितत्वधीरित्यादिक ग्रन्थस्य विवरणम्, अहङ्कार अहमिति प्रतिमीयते-न्द्य, ममकार, प्रतिमायामदीयो भावत्वाभिमानश्च। न च देवताना विशेषदर्शनात् ममत्वधीरहङ्कार-ममकारयो कथं उभय इति वाच्यम्। विशेषदर्शनसत्त्वेऽपि चाक्षुष्य-स्पर्शस्य सम्भवात्। न च अन्यतादृशाद्यभावविनाशितया तादृशज्ञान-नाशोत्तरं कथं प्रतिमादौ पूज्यत्वमिति वाच्यम्। तादृशज्ञानवदेव तादृशज्ञानजन्य-संस्कारस्य स्थितत्वात्। चाण्डालादा पूजितत्वधीरिभावाभावादुत्र प्रतिष्ठितत्व धीरिति। यावदस्पृश्यस्पर्शनादिसंसर्गाभाव इति अत्र कूटत्वावच्छिन्नं संसर्गपदम् अन्यथा सिद्धादिघटितकूटस्यैव यावत्कालीनत्वापत्तेः। अथ कथं प्रतिष्ठाकालीनयावदस्पृश्यस्पर्शसंसर्गा-भाव प्रतिष्ठाध्वंसकालीन कथं न पूज्यताप्रयोजक, न च अप्रतियोगिकालीनत्व अकस्मात्कालीनत्वोपलक्षणेन प्रतिष्ठाध्वंस विशिष्टान्य अभावसंसर्गाभावकूटस्य पूज्यता प्रयोजकत्वविवक्षयैव दोष इति वाच्यम्। अत्र प्रतिष्ठाद्वितीयक्षणे अस्पृश्यस्पर्शं तृतीय-क्षणे प्रतिष्ठाध्वंस तत्र द्वितीयक्षणावच्छेदेन अस्पृश्यस्पर्शसंसर्गाभावस्य प्रतिष्ठाध्वंसकालीनत्वा-भावात् कूटान्तर्गततया तद्विशिष्टकूटस्य द्वितीयक्षणेऽपि सत्त्वात् तत्क्षणे पूज्यतापत्ति-रिति चेत्, न, प्रतिष्ठाध्वंसविशिष्टकूटस्याभावविशिष्टाभावस्य पूज्यताप्रयोजकत्वविव-क्षणात् कूटस्य प्रतिष्ठाध्वंसविशिष्टत्व अविशेषणानिष्ठाविशेषणतानिरूपकताकत्वं च अप्रतियोगिप्रतिष्ठाकालीनात्पृश्यस्पर्शसंसर्गाभावान्तरस्यानुयोगितावच्छेदकत्वं स्वाश्रय-क्षेण, यावत्प्रतिष्ठाद्वितीयक्षणे अस्पृश्यस्पर्शं तादृशप्रतिष्ठाकालीनास्पृश्यस्पर्शसंसर्गाभाव-स्यान्वयानुयोगिताघटत्वविरहात् तत् कूटस्य तत्र न। तादृशप्रतिष्ठाध्वंसाधिकरण-कालीनविशिष्टाभावावच्छेदकताकस्य दृष्टान्ते नीताध्वने पूज्यतापत्तिरिति विभाव-नीयम्॥ १२॥

ननु तुलापरीक्षादौ परीक्षाविधिना शक्तिमुक्तादौ जन्यते तथा नमनोन्नमनादिक फल जन्यते, इत्यत आह,—

जयेतरनिमित्तस्य वृत्तिलाभाय केवलम् ।

परीक्ष्यसमवेतस्य परीक्षाविधयो मता* ॥ १३ ॥

जयस्तदितर पराजय, तन्निमित्तस्याऽदृष्टस्य परीक्षणीयपुरुष समवेतस्य वृत्तिलाभाय फलानुकूलसहकारिलाभाय परीक्षाविधयो मता स्वीकृता । योऽहमनेन परीक्षाविधिना तुलामारूढ सोऽहं पापवान मिथ्यावादी वेति ज्ञान सहकारि । यद्वा वृत्तिलाभाय जन माय, तथाच प्रतिज्ञानुरूपा शुद्धिमपेक्ष्य धर्मोऽशुद्धिमपेक्ष्याधर्मो जन्यते । एतेन महाग्रधाकरणादिना पुण्यस्याजननात कथं तस्य सहकारि तादृग्ज्ञान स्यादित्यपि परास्तम् ॥ १३ ॥

साङ्ख्यास्तु पुरुषश्चैतन्यात्मक चकारस्य प्रत एव कूटस्थो नित्य । प्रकृतिरचेतना परिणामिनी नित्या एका, प्रकृतेश्च प्रथम परिणामो

तति मतसाऽदृष्टस्यति तयो जय पराजयो चादृष्टस्य शुभाशुभादृष्टस्य जयनिमित्तस्य धर्मस्य पराजयनिमित्तस्याधर्मस्यति यावत् परीक्षणीयपुरुषति यच तदभावयोरन्तर प्रसन्न निर्णयपुरुषस्य फलानुकूलति तादृशाभ्यवरैकविषयानुकूलेति ज्ञानं सहकारि न याति याति सत्यमुक्त पापवान मिथ्यावादी वा तुलारोहणकाले सोऽहं पापवान् मिथ्यावादी वा इति ज्ञानम् प्राधान्यसम्यग्ज्ञानं जायते तादृशज्ञानाच्च पूर्वकृतकर्मजनितादृष्टस्य कारित्व तत्र च नमनोन्नमने जय पराजयौ च जायेते इति भाव शुद्धि मिथ्या फलम् शुद्धि पापम् । तथाच पापाभिमानी योऽहमनेन परीक्ष विधिना तुलामारूढ सोऽहं निष्पाप इति प्रतिज्ञा परीक्षाकाले वक्तव्यस्तथा तत्र यदि सत्यप्रतिज्ञा भवति तर्हि तदुत्तरपरीक्षाविधिना धर्मो जायते अन्यथा चेत् असत्यप्रतिज्ञा भवति तादृश कर्मणैव अधर्म नमनोन्नमनादिक जय पराजयश्च भवति इति यत स्यादित्यस्य तात्पर्यम् ॥ १३ ॥

प्राधानतमुख्यत्व नित्यत्वं साङ्ख्यास्तु चकारस्य अपरिणामी इत्यत परि

बुद्धिर्महत्तत्त्वं, तत्राष्टौ धर्मा ज्ञानाज्ञानैश्वर्यानैश्वर्यवैराग्यावैराग्य धर्माधर्मरूपाः, बुद्धि सुख दुःखेच्छा द्वेष प्रयत्न धर्माधर्मा वेत्यष्टौ वा, भावनायास्तैरनङ्गीकारात् अनुभवस्यैव स्मृतिकाले सूक्ष्मतयावस्थानात्। अचेतनायाः प्रकृतिकार्याया बुद्धेश्चैतन्याभिमानान्यथानुपपत्त्या स्वाभाविकचैतन्यस्वरूपः पुरुषः सिद्धः, धर्मधर्मिणोरभेदात्। तत्र प्रकृतेर्महान् महतोऽहङ्कारस्तस्माद्रूप रस गन्ध स्पर्श

धर्मिण एव कारणत्वादिति। परस्य चर्माद्युत्पत्त्यर्थं, कुठस्य [illegible] परिणामिनीति कार्यरूपेणोऽस्य परिणाम इतिसिद्धेत्यर्थः। एवेति अस्मदीका मीढित प्रकृत्या बुद्धौ [illegible] सुखदुःखाभिमानित्वेन सत्वगुणात्मक मोहितां तमोगुणात्मक ज्ञानमित्यर्थः। महत्तत्त्वमिति एतदेवात्र स्पष्टयति, बुद्ध्यात्मक महत्तत्त्वं, [illegible] चित्तमनोबुद्ध्यहङ्काराः यत्राष्टौ भावविधा धीकार्या [illegible] वापि ज्ञानाज्ञानादि [illegible] प्रकृति पुरुषविवेकेन [illegible] अविद्यादि अष्टविधं तत्र [illegible] भावितत्वं [illegible] [illegible] [illegible] [illegible] [illegible] नतु ज्ञानादीनामधर्मत्वात् [illegible] कथं बुद्धिधर्मत्वमित्यत आह बुद्धीति, [illegible] तथाच बुद्धिप्रकृतिकत्वमात्रपरत्वमपि [illegible] स्मृतिजनकतया [illegible] आह। धर्माधर्माविति [illegible] सामान्यविशेषभेदात् [illegible] किं [illegible] आह, चैतन्याभिमानेति [illegible] तथाच [illegible] अत्र चैतन्य [illegible] आह। चैतन्यस्वरूप इति, ननु पुरुषे चैतन्याश्रयत्वं [illegible] चैतन्यस्वरूपत्वं कथं [illegible] इत्यत आह, धर्म धर्मिणोरिति। तन्मात्राणि पञ्च महाभूतानि यानि, तत्राच [illegible] [illegible], [illegible] तेज, [illegible] वायु, [illegible] तथा। मूलप्रकृतिरविकृतिरिति, [illegible] अविकृति महत्। [illegible], तथाच इन्द्रियाण्येकादश, महाभूतानि पञ्च [illegible] इति [illegible], पुरुषस्तु [illegible] [illegible]

शब्द तन्मात्राणीति सप्त, चक्षुस्त्वक्घ्राणं रसना श्रोत्र मनांसि वाक् पाणि पाद पायूपस्थानि इन्द्रियाणि तन्मात्रै पञ्च महाभूतानि पृथिव्यप्तेजोवाय्वाकाशानि जायन्ते। तदुक्तम् "मूलप्रकृतिरविकृति र्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः।" पञ्च महाभूतान्येकादशेन्द्रियाणि चेति षोडश। चैतन्यस्य नित्यस्य स्वाभाविकेष्टानिष्टविषयावच्छिन्नत्वस्याभावेऽनिर्मोक्षः स्यात् प्रकृत्यधीनत्वेऽपि विषयावच्छेद्यत्वस्य प्रकृतेर्नित्यतया तथैवानिर्मोक्षप्रसङ्गः, घटादेरनित्यस्यापि स्वाभाविकचैतन्यावच्छिन्नत्वे दृष्टादृष्टविभागानुपपत्तिश्च, इन्द्रियमात्रापेक्षो यदि विषयचैतन्यावच्छेदस्तथापि व्यासङ्गानुपपत्तिरतो मनः स्वीकार्यं यत्सम्बन्धेन इन्द्रियस्य विषयीयचैतन्यावच्छेदनियामकत्वम्। स्वप्नदशायां व्याघ्रत्वाभिमानिनो न नरोऽहमित्यभिमानः अतस्तन्नियमनाय नियतविषयाभिमानव्यापारकोऽहङ्कारोऽपि स्वीकार्यः। जाग्रत्स्वप्नसुषुप्तिषु श्वासप्रश्वासदर्शनात् प्राणापान यदनुवर्त्तते तदनुमितश्च।

[illegible] इति [illegible]मिति भावः। ननु नित्यस्य चैतन्य [illegible] [illegible] किं महदादिस्वीकारेण [illegible] चैतन्यस्येति स्वाभाविकेति स्वाभाविकम् [illegible] यत् [illegible] सह अवच्छिन्नत्वं [illegible] [illegible] इति यावत् [illegible]। [illegible] स्यादिति [illegible] चैतन्यस्य नित्यत्वेन [illegible] [illegible] स्यात् विषय [illegible] सर्वत्र भोक्तृत्वात्, [illegible] महदादिस्वीकार [illegible] भावः। ननु प्रकृतेरेव विषयावच्छेद्यत्वनियामकत्वमस्त्वित्यत आह प्रकृत्येति। ननु [illegible] इत्यत आह घटादेरिति दृष्टादृष्टविभागानुपपत्तिश्च [illegible] [illegible] इन्द्रियार्थ विषयसम्बन्धं युगपत् [illegible] स्वकार्यानुपपत्तौ व्यासङ्ग तदनुपपत्ति

प्रागुक्तभावाष्टकयोगि सौकार्य्यम्। तस्य ज्ञानरूपपरिणामेन सम्बद्धो विषयः पुरुषस्य स्वरूपतिरोधायकः, एवञ्च बुद्धितत्त्वनाशादेव विषयावच्छेदाभावात् पुंसो मोक्षः। भेदाग्रहाच्च चेतनोऽहं करोमीत्यभिमानः।१ तदुक्तं "प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्व्वशः। अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते" इति। सा च बुद्धिरंशत्रयवती, पुरुषोपरागः विषयोपरागः व्यापारावेशश्चेति, ममेदं कर्त्तव्यमित्यत्र ममेति चेतनोपरागः बुद्धिचेतनयोर्भेदाग्रहात् अतात्त्विकः, इदमिति विषयोपरागः, तदुभयायत्तो व्यापारावेशः। बुद्ध्यारोपितचैतन्यस्य विषयेण सम्बन्धः ज्ञानं, ज्ञानेन सम्बन्धश्चेतनोऽहं करोमीत्युपलब्धिरित्याहुः। अत्राह,—

१।

सौगतमतमहं इति कपिलार्थं, तत्र चैतन्याविच्छन्न उपाधिभेदेन सौकार्य्यमिति भाव। अहङ्कारस्वीकारे युक्तिमाह, अहङ्कारस्त्विति, अहङ्कारार्थं "नियतविषयाभिमानविशेषश्च ततो निराऽहङ्कार अत्र स्वीकार्य्यं अन्यथा अनियतविषयाभिमानापत्तेः, तथाचाहङ्कारस्वीकारे [illegible] एवाभिमान इति नियतविषयाभिमानविशेषः। नियतविषयाभिमानीति नियत नियमित विषय आत्म देहादि यस्य सोऽभिमानी व्यापारो यस्य तादृशाऽहङ्कार इत्यर्थः। बुद्धितत्त्व सात्त्विकादि कार्यादि श्यादि, तत्राहारे स्वाश्रयपुरुषकल्पितम्, तथाच आवश्यकत्वादेकत्वेऽपि अनियतव्यापारादिकार्यदर्शनात् एकजातीयकार्ये एकजातीयकारणव्यापारस्यानुपपत्तेस बुद्धितत्त्वभेदस्य" स्वीकार्य्यं अन्यथा सुषुप्तिदशायाम् अहङ्कारपर्य्यन्तव्यापारविरहेण तैजसकार्य्यानुपपत्तिरिति भावः। तत्र ज्ञानरूपपरिणामेनेत्यादि, अत्र भाव बुद्धितत्त्वस्य इन्द्रियप्रणालिकया तत्परिणामेनाय घट इत्यादिज्ञानेन सम्बन्धो घटादिविषय स्वाकारसमर्पणात् बुद्धिप्रतिबिम्बितचैतन्यसम्बन्धेन पुरुषस्य पुरुषस्वरूपतिरोधायकेन पुरुषस्य संसारसम्पादक बुद्धितत्त्वनाशे तु तत्परिणामभावात् घट इत्यादिज्ञानरूपत्वाभावात् विषया वच्छेदकाभावात् [illegible] तु न पुन [illegible]। एतच्च [illegible] दर्शयति, प्रकृतेरिति प्रकृतेर्या सत्त्वा गुणैः [illegible] क्रियमाणानि [illegible] अहङ्कार.

कर्तृधर्मा नियन्तारश्चेतिता च स एव न. ।
अन्यथाऽनपवर्ग. स्यादसंसारोऽथ वा ध्रुव ॥ १४ ॥

कृतिसमानाधिकरणास्तावद्धर्माधर्मौ द्वेषेच्छा भोगस्य कृतिसामानाधिकरण्यात्। एवञ्चेतिता चेतन स एव कृतिमानेव सोऽस्माकमत चेतनोऽहं करोमीतिप्रत्ययबलात्। दूषणान्तरमाहान्यथेति। यदि बुद्धिर्नित्या तदा बुद्ध्युपहितात्मन सर्वदावस्थानात् अनिर्मोक्ष स्यात् यद्यनित्या तदोत्पत्ता आत्मा अनित्यभावस्यात्, स्वत्वभावात् तथाच तदुत्पत्तौ मात्र तदान्वितधर्मादेरभावेन बुद्धितत्त्वस्यानुत्पत्तौ नियतशरीरेन्द्रियादिकार्यस्यानुत्पत्तौ असंसार स्यादित्यर्थ ॥ १४ ॥

चार्वाकस्तु भवतु चेतनधर्मोऽदृष्ट चेतनश्च न नित्यविभु किन्तु कायाकारपरिणतभूतविशेष गौरोऽहं जानामीति प्रतीत्या रूपवत्त्वसिद्धेरित्यत्राह, —

अहमितिप्रत्यय तेन विमूढ आत्मा अन्त करण तत तथाविध पुरुष कर्ता जानाति मन्यते इत्यथ। बुद्धित उपलब्धभेदमदर्शनात् बुद्ध्यात्मना दर्शयति ता चेति उपदाय इत्यस्य अतीन्द्रियापि अतर्कीयतात पुरुषसम्बन्ध स च दर्पणसम्बद्धन विम्बवत् बुद्ध्यात्मचैतन्यप्रतिबिम्बरूपमारोपात्तात्त्विक विशेषोपराग विना कारेण बुद्धि तत्त्वस्य परिणाम स च नित्यतावात्मनस्तत्त्वजनितत्वेन वा मत। तदभावन पूर्वोक्तपुरुषोपराग विशेषोपरागाभीन व्यापारोत्थ तत्तत्त्व अन्यदेवेत्याह तेन कारण मनुष्यस्तापी व्यापारमेव इत्यथ। अनेन सुखस्य इति ज्ञानेन अर्थ घट इति ज्ञानेन सुखस्य चैतन्यस्यात्मनिष्ठ सम्बन्ध जनतोऽहं करोमि इत्याद्युपलब्धिरपलापाच्च। नियन्तार प्रयोजक बुद्धितत्त्वस्यानुत्पत्तेरिति अनन्यत्र प्रति अदृष्टस्य हेतुत्वादिति भाव ॥ १४ ॥

देहाभ्यन्तरेन्द्रियान्तरप्रवर्तकत्व मतमुत्थाप्य निरस्यति चार्वाकस्त्विति नन्वनादृष्टेऽपि चैतन्यवत्त्व आत्म भूतान्वित चाह कायाकारेति तथाच कायाकारपरिणतभूत

नान्यदृष्टं स्मरत्यन्यो नैकं भूतमपक्रमात् ।
वासनासंक्रमो नास्ति न च गत्यन्तरं स्थिरे ॥ १५ ॥

रेकैव इत्यत्र। न चेदमप्रयोजकमिति वाच्यम्। परिमाणस्य समानजातीयो-त्कृष्टपरिमाणजनकत्वनियमात् परमाणुपरिमाणसजातीयं द्व्यणुकपरिमाणं यदि परमाणुपरिमाणजन्यं स्यात् तदा परमाणुपरिमाणादुत्कृष्टं स्यादिति तर्कस्य प्रयोजकत्वात्। ननु तथापि कथमीश्वरसिद्धिरित्यत आह, सर्गादाविति, तदानीं सर्गाद्यकालीनपरमाणुद्वित्वसंख्या अपेक्षाबुद्धिजन्या द्वित्वादित्वानुमानेन अस्मदाद्यपेक्षाबुद्धेरीश्वरीयापेक्षाबुद्धिसिद्धावीश्वरसिद्धिरिति पर्यवसानम्। अथ परमाणुगतद्वित्वादिसंख्या नित्यैवास्तु कथं तज्जनकतया ईश्वरीयापेक्षाबुद्धिसिद्धिरिति चेत् परमाणुगतद्वित्वादिसंख्या नित्या अनेकसमवेतत्वव्याप्यजातिमत्त्वात्, गुणत्वव्याप्यजातिमत्त्वाद्वा, द्वित्वादिसंख्यायां नित्यत्वे नित्यानेकसमवेतत्वव्याप्यजातिमत्त्वाभावापत्तेः इति वाच्यम्। न च परमाणुद्वित्वादीनां अनित्यत्वे इति वाच्यम्। अनित्यत्वेऽपि तदेकत्वापत्तेः। न च मानाभावः तादृशानेकसमवेतत्वव्याप्यजातिमत्त्वस्य अनित्यत्वेन साधयितुमशक्यत्वात्। न च घटादिवत् परमाणुगतद्वित्वादिसंख्याया अपेक्षाबुद्धिजन्यत्वं नापेक्षाबुद्धिजन्यत्वमिति वाच्यम्। अपेक्षाबुद्धेर्द्वित्वादिजनकत्वे द्वित्वादिसंख्याया अपेक्षाबुद्धिजन्यत्वनियमे गौरवात् अपेक्षाबुद्धेः घटपटादिद्वित्वादिसंख्याया अपेक्षाबुद्धिजन्यत्वेन द्वित्वादिजनकत्वकल्पनायां लाघवात्, तथा च द्वित्वादौ अपेक्षाबुद्धेर्हेतुत्वं कल्पनीयं तत्र प्रत्यक्षसिद्धत्वात्। न च धीकल्पने लाघवात् द्वित्वादिजन्ये गौरवमिति वाच्यम्। फलमुखगौरवस्यादोषत्वात्। न च अपेक्षाबुद्धिर्निमित्तकारणत्वात् एकत्वद्वयापेक्षाबुद्धिद्वित्वादिरूपकार्यद्वयोत्पत्तौ अपेक्षाबुद्धिनाशस्य द्वित्वनाशहेतुत्वात्, तत एकापेक्षाबुद्धिरवच्छेद्या समवायिकारणसमवायिकारणयोरेकत्वयोस्तु तद्धर्मविशिष्टयोः द्वित्वादिप्रत्यक्षविषयोपपत्तौ द्वित्वं प्रति एकत्वद्वयावच्छिन्नस्य समवायिकारणत्वेन तदेकत्वनियामकत्वमेवोपपत्तौ किमपेक्षाबुद्धिविशेषस्य हेतुत्वकल्पनेनेति वाच्यम्। अपेक्षाबुद्धेर्द्वित्वत्वावच्छिन्नं प्रति समवायसम्बन्धेन हेतुत्वे गौरवात् समवायसम्बन्धेन तत्पुरुषीयद्वित्वादिप्रत्यक्षत्वावच्छिन्नं प्रति विशेष्यतासम्बन्धेन तत्पुरुषीयापेक्षाबुद्धेर्हेतुत्वे लाघवात् तत्पुरुषीयप्रत्यक्षविशेष्यत्वस्य कार्यतावच्छेदके निवेशात् नैतत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वादेस्तत्पुरुषेण प्रत्यक्षापत्तिः। अथ तथापि सामान्यसामग्रीबलादेतत्पुरुषीयद्वित्वादेरपरपुरुषेण प्रत्यक्षापत्तिः।

विश्वविदन्वय इति विशिष्टसाध्यत्वं, तेन नित्यसर्वविषयकज्ञानसिद्धिः ॥ १ ॥

ननु शरीरविशिष्टस्य कर्त्तृतया विशेषणबाधात्को विशिष्टबाध

पेक्षाबुद्धिजन्यद्वित्वाश्रयपृथिवीत्व व्याप्यत्व स्यादिति तत्पृथिवीयद्वित्वप्रकारतानिरूपितविशेष्यतासम्बन्धेन तत्पृथिवीयप्रत्यक्षं प्रति द्वित्वत्वासम्बन्धेन तत्पृथिवीयापेक्षाबुद्धेर्हेतुत्वं वाच्यं तथाच कथमपेक्षाबुद्धेर्द्वित्वादिहेतुत्वमिति चेत् न, एतादृशवाच्य कारणभावकल्पनापेक्षाबुद्धिजन्यद्वित्वमात्रे, द्वित्वप्रकारकप्रत्यक्षजनकेऽपि तदानीं घट घटाविति द्वित्वमिति द्वित्वविशेष्यकप्रत्यक्षाभावापत्तेः परन्तु द्वित्वनिष्ठलौकिकविषयतासम्बन्धेन तत्पृथिवीयप्रत्यक्षं प्रति तत्पृथिवीयापेक्षाबुद्धिजन्यद्वित्वस्य विषयविधया हेतुत्वस्वीकारात् द्वित्वप्रकारतानिरूपित द्वित्वनिष्ठलौकिकविषयतानिरूपितविषयतासम्बन्धेन तत्पृथिवीयप्रत्यक्षं प्रति तत्पृथिवीयापेक्षाबुद्धेः स्वजन्यद्वित्वासम्बन्धेन हेतुत्वेऽप्यपेक्षाबुद्धिविरहदशायाम् इमे द्वित्वमिति प्रत्यक्षस्य द्वित्वनिर्विकल्पकस्य वारणात्। न चापेक्षाबुद्धिविरहदशायां द्वित्वादिसत्त्वे का क्षतिरिति वाच्यम्। अनुभवविरोधात्। न च ईश्वरीयापेक्षाबुद्धेः परमाणुगतद्वित्वोत्पादकत्वे परमाणुद्वये नियतं द्वित्वोत्पत्तिरिति वाच्यम्। धर्माधर्मादेरपि निमित्तकारणत्वेन तद्वारणसम्भवात्। न च ईश्वरीयापेक्षाबुद्धेर्नित्यत्वेन परमाणुगतद्वित्वनाशासम्भव इति वाच्यम्। अस्मदादीनामिव परमाणुगतद्वित्वादीनां कोटरस्थितद्वित्वादिनाशवत्तथाकारणान्तरस्य नाशकत्वसम्भवात्। एकत्वादिसंख्यावत्सर्वदिशां एकत्व द्वित्वादिसंख्या गुणनिष्ठत्वेऽपि द्रव्य एव एक इत्यादिप्रतीतेर्मुख्य गुणादिषु च तत्प्रयोगो गौणः गुणान्तरवत्त्वम् एकमात्रवृत्तित्वाद्विशिष्टत्वरूपं तत्र द्वित्वादिकमपेक्षाबुद्धिविशेषस्य समवेतकार्ये इति साहचर्यात् द्रव्यस्यैव हेतुत्वात् गुणादिषु न संख्या सम्भव इति। विश्वविदन्वयत्वमिति विशिष्टस्य विश्वविषयकज्ञानवत्त्व सम्बन्धत्व नित्यत्वं साध्यमिति भवः। सैषेति तथाच विशिष्टान्वयव्यतिरेकेऽपि बाधके विशेषस्य विशेषणविशेष्योभयान्वितत्वं नियम इति भावः। ईश्वरीयज्ञानस्य च सत्त्वमात्रस्यादिकल्पनायां गौरवात् उक्तप्रमाणद्वारैव उपादानगोचरापरोक्षज्ञानवत्त्वसिद्धौ नित्यत्वादय ज्ञानसर्वविषयसिद्धिः एवं तत्सुज्ञानस्य कारणाभावप्रयुक्तया विनिगमनाविरहेण सर्वविषयकत्वसिद्धिरिति भावः ॥ १ ॥

कार्यत्वहेतौ बाधदोषमाह, शरीरविशिष्टत्वेति शरीरविशिष्टस्यैव कर्तृत्वेऽर्थे,

इति (१), कर्तृजन्यत्वव्यापकशरीरजन्यत्वाभावात् कर्तृजन्यत्वाभाव इति सत्प्रतिपक्षता च (२)। यद्वा कर्त्ता शरीर्येव इति व्याप्तिविरोधिनो यद्वा व्याप्त्या यथादर्शनपक्षतया शरीरी कर्त्ता उपनेयः, पक्षधर्मतया च क्षित्यादावशरीरीति साध्याप्रसिद्धिः विशेषविरोधश्च (४), यद्वा शरीरजन्यत्वस्योपाधिना व्याप्यत्वासिद्धिः (५), इति कार्य्यत्वहेतौ पञ्च दोषास्तत्राह ।

विशेषणबाधात्मक कर्तृजन्यत्वविशेषणाभावस्य, विशिष्टस्य सकर्तृकत्वस्य । यद्यपि बाधस्थलीयपक्षे निरस्तः तथापि तत्र योऽन्यानुकूलविकल्पो निरस्तः अत्र तु अनुमानबाधो निरसनीयः अनुमानञ्च ईश्वरो न कर्त्ता शरीराभावादित्येवरूपम्, एतादृशानुमान-साध्यविशेष्यांशे शरीरविशिष्टस्य कर्तृत्वेति। तथा चेतादृशानुमानेन क्षितिः सकर्तृका कार्य्यत्वादित्यनुमानस्य बाध एव । अतएव एव ईश्वरस्य अशरीरत्वसिद्धेरिदम् । अथैवानु-मानबाधमुक्त्वा सत्प्रतिपक्षमेव दर्शयति, कर्तृजन्यत्वव्यापकेति, तथा च क्षितिरकर्तृका शरीराजन्यत्वादिति विपरीतकोटिसाधकानुमानेन सत्प्रतिपक्ष इति भावः । अथवाऽत्र ईश्वरानुमानबाधमाह यद्वेति, कर्त्ता शरीर्येवेति कर्त्ता शरीर्य्येवेतिव्याप्तिप्रतिसन्धानव्याप्ति-विरोधिनोऽस्य, विशेषणस्यैवैकाश्रये विशेष्यत्वञ्च यत्र विशेषणव्याप्यत्वस्याप्यत्व-साधकत्वात्, तथा च क्षितिः सकर्तृका कार्य्यत्वादित्यनुमानेन पक्षधर्मतावलात्शरीरित्वं-साध्यत्वमिति कार्य्यं तत्र च शरीरित्वव्यापकत्वं तदप्रतिबन्धकं तत्साध्यतया शरीरतधर्मसंसर्गेणैकव्याप्यत्वसाधकत्वात्साध्यविशेषणासिद्धिरिति विशेषविरोधइति-भाव । साध्याप्रसिद्धिमाह, यद्वेति, यथादर्शनपक्षतयेति यथा कर्त्ता च शरीरी तथा घटादिकर्त्ता कुम्भकारादिरिति यथादर्शनसम्बोधया, व्याप्त्या शरीरित्वविशिष्टत्वं च व्याप्त्या, शरीरी कर्त्ता उपनेय कर्तृमात्रे शरीरित्वमनुमेयमित्यर्थ, पक्षधर्मतया इतरबाध-सहकारेण, क्षित्यादौ सर्वाङ्कलीनक्षित्यङ्कुरादौ, अशरीरीति कर्त्ता उपनेय इति पूर्वेणान्वय, कर्त्तरि अशरीरित्वम् अनुमेयमित्यर्थ, साध्याप्रसिद्धिरिति ईश्वरस्य कर्तृत्वे शरीरित्वव्यापकत्वेन शरीरिणस्तु पक्षधर्मतावलेनाशरीरित्वस्य च अभावात् शरीरित्वा-शरीरित्वोभयविशिष्टकर्तृत्वस्य साध्याप्रसिद्धिरित्यर्थ, अत्र हेतुमाह विशेषविरोधश्चेति वा, ईशो, तत कर्तृत्वनियतशरीरित्वव्याप्तिबलेन उपस्थितस्य कर्त्तरि शरीरित्वस्य विरोधश्च

न बाधोऽस्योपजीव्यत्वात्, प्रतिबन्धो न दुर्बलैः ।
सिद्ध्यसिद्ध्योर्विरोधो न, नासिद्धिरनिबन्धना ॥ २ ॥

ईश्वरे धर्मिणि शरीरबाधात् कर्त्तृत्वबाधो (१) न, अधिकरणज्ञानं विना अभावज्ञानासम्भवात् अस्य कार्य्यत्वस्य धर्मिसाधकस्याधिकरणज्ञानजनकतया अवश्यापेक्षणीयत्वेन बलवत्त्वात्, एवञ्च न विधेयपक्षबाधात्मको विशिष्टबाध प्रत्यक्षात्मक इति, ईश्वरो न कर्त्ता

पक्षधर्मताबलेनोपस्थितस्य कर्त्तुरपि अशरीरित्वरूपविशेषस्य च तयो विरोध ईश्वरे धर्मिणि नित्यज्ञानवत्त्वयोर्विरोध । एतदेवोक्तं रामभद्रेण "ईश्वरो न कर्त्ता अशरीरित्वादिति बाधोऽयं दोष क्षितिरकर्त्तृका शरीराजन्यत्वादिति सत्प्रतिपक्षो वा कथं यतो यन्नेति व्याप्तिविरोधिनो वा शरीरित्वाशरीरित्वयोर्विरोधो वा शरीरजन्यत्वमुपाधिर्वा" इति । विपक्षे विशेष्यविरोधश्चेत्यथ पाठ प्रकाशकाराद्यसम्मतत्वान्न समीचीन । प्रकाशकारैस्तूक्तं "व्याप्तिपक्षधर्मतोपस्थाप्यविशेषयोर्विरोधेन विशेषविरोध स्यात्" इति । व्याप्यत्वासिद्धिमाह, शरीरजन्यत्वमुपाधिरिति, यत्र यत्र सकर्त्तृकत्वम् उभयवादिसिद्धं तत्र तत्र शरीरजन्यत्वम् इति शरीरजन्यत्वस्य साध्यव्यापकत्वम्, यत्र यत्र कार्य्यत्वम् उभयवादिसिद्धं घटादौ तत्र शरीरजन्यत्वम् इति, अत्र शरीरजन्यत्वाभावेन साधनाव्यापकत्वमिति शरीरजन्यत्वस्य उपाधित्वम् । कार्य्यत्वादिति कार्य्यत्वहेतावित्यर्थ दोषा इति यथायथम् विपक्षबाधादिरूपलिङ्गानुमानविरोधकदोषा न तु हेत्वाभासमात्रात्मका दोषा इति । दोषानुद्धरति, मूले न बाधोऽस्योपजीव्यत्वादिति, बलवत्त्वात् ईश्वरसिद्धि अवश्यम्भावात् इदञ्च कारिकाद्योपजीव्यत्वादित्यस्यार्थविवरणम् । न अधिकरणज्ञानं विनापि बाधो इत्यत्रापि बाधोऽनित्यत्ववत् ईश्वरे कर्त्तृत्वं बाधोऽनित्यत्वं यत्र न सम्भवतीति तात्पर्यम् । धर्मिविशिष्टस्य व्याप्यस्य ग्रहस्य विशेषणज्ञानजन्यत्वनियमेन ताद्रूप्यतोतो बाधो विशेषणस्य कुत्रापि विशिष्टस्य च बाधकत्वात् । न चात्रापि तथा सम्भवति, विशिष्टबुद्धि प्रति विशेषणज्ञानस्य हेतुत्वेन प्रमाणान्तरेणापि विशेषणज्ञानस्यापेक्षणीयतया ईश्वररूपविशेषणज्ञाने यत् प्रमाणान्तरापेक्षणीयं तत्र ईश्वरस्य कर्त्तृत्वसिद्धा ईश्वरे कर्त्तृत्वं अनित्यत्ववत् बाधितत्वात् । अनुमानबाधोऽपीत्यादि, अनुमानेऽपि परा-

अशरीरत्वात् इत्यनुमानबाधोऽपि नेत्यर्थः । क्षित्यादि न सकर्तृकं शरीराजन्यत्वात् इति (२) न प्रतिबन्धक, सत्प्रतिपक्षहेतौ शरीराद्य वैयर्थ्यात् व्याप्यत्वासिद्ध्या दुर्बलत्वात् । तृतीयेऽपि कार्यत्वव्याप्ति पक्षधर्मत्वसहकारात् विपक्षबाधकतर्कावताराच्च बलवत्त्वम् अपन्य स्यायाः कर्त्ता शरीर्य्येवेति व्याप्तेर्दुर्बलतया न प्रतिबन्ध । चतुर्थे च यदि पक्षधर्मतया अशरीरी उपस्थितस्तदा न विरोध, कर्त्तृत्वस्या

।

शरीरेण [illegible] इत्यनुमानस्यासिद्धत्वेन न बाधकत्वमिति स्पष्टम् । [illegible] पक्षधर्मत्वव्याप्यत्वेन बलवत्त्वात् शरी राद्यर्थम् । शरीराजन्यत्वादिति [illegible] [illegible] धर्मिविशेषणत्वेन [illegible] निष्फलत्वादित्यर्थः, व्याप्यत्वासिद्ध्या [illegible] [illegible] । न च शरीरा [illegible] दुर्बलत्वात् [illegible] इति वाच्यम् । यत् [illegible] [illegible] [illegible] तत्र [illegible] इति वाच्यम् । यत् [illegible] [illegible] अन्यथासिद्ध्या [illegible] [illegible] [illegible] [illegible] [illegible] शरीरान्यत्वादिना [illegible] शरीरादस्य [illegible] । न च शरीराजन्यत्वादिना [illegible] दुर्बलत्वात् । इत्थिम्भी सार्वत्रिकमिति वाच्यम् । तत्र [illegible] [illegible] कार्यत्वव्याप्ति कार्यत्वलिङ्गकर्तृत्व न दुर्बलमिति [illegible] विरुद्धोऽपि [illegible] कार्यत्वव्याप्ति पक्षधर्मतासहकारात् व्याप्ते, [illegible] [illegible] [illegible] विपक्षबाधकतर्कावतारात् विपक्षस्य [illegible] [illegible] बाधकी [illegible] विपक्षबाधकतर्कावतारात् [illegible] [illegible] न आदिमे च [illegible] कार्यत्वं यदि [illegible] स्यात् कर्तृ [illegible] [illegible] दुर्बलतया विपक्षबाधकतर्का [illegible] [illegible] तेन [illegible] [illegible] । विरोधित्वा भावेन [illegible], न प्रतिबन्ध न [illegible] । अशरीरी उपस्थित [illegible] विरुद्धोऽपि चतुर्थे चेति, पक्षधर्मतया [illegible] अशरीरी कर्त्ता उपस्थित कर्तृत्वमिति [illegible] [illegible] [illegible] कर्त्तरि [illegible] कर्तृत्वे शरीरित्वव्याप्यत्व [illegible] [illegible] कर्तृत्वे शरीरित्वमुपनेयमित्यसङ्गतमिति भाव । [illegible] इति अशरीरि [illegible] कर्त्तृत्वं [illegible] , [illegible] [illegible] [illegible] इति भाव । [illegible] इत्यर्थः । तथाच [illegible] [illegible] [illegible]

शरीरित्वस्य समानाधिकरणस्योपलम्भात् तदनुपस्थाने तु न विरोधः, विरोधाश्रयस्यासिद्धेः। पञ्चमे च विपक्षबाधकतर्कसत्त्वात् तदभाव निबन्धना समानरूपा सिद्धिर्व्याप्यत्वासिद्धिर्वा न शरीरजन्यत्वोपाधे रपि विपक्षबाधकाभावेनाप्रयोजकत्वात् ॥ २ ॥

ननु यदीश्वरः कर्त्ता स्यात् शरीरी स्यादिति प्रतिकूलतर्काः तथोऽनुकूलतर्काभावश्च तत्राह।

तर्काभासतयाऽन्येषां, तर्कशुद्धिरदूषणम्।
अनुकूलस्तु तर्कोऽत्र कार्य्यलोपो विभूषणम् ॥३॥

प्रतिकूलतर्कास्तावदीश्वरासिद्धा आश्रयासिद्धा इत्याभासाः।

[illegible] "शरीरित्वमशरीरित्वञ्च" [illegible] ईश्वरस्येव [illegible] इति। [illegible] ॥ २ ॥

[illegible]

कर्त्तारं विना कार्य्यं न स्यादिति तर्कस्य विमुषणं उपकारकः ।
"अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते" इत्यागमश्च (गीता०) । "आर्षं धर्म्मोपदेशञ्च वेदशास्त्राविरोधिना । यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतर" ॥ (मनु० अ० १२) इति तर्कानुगृहीतस्यागमस्य बलवत्त्वम् ॥ ३ ॥

ननु कार्य्यत्वं प्रयत्नजन्यत्वेऽप्रयोजकम् अत आह ।

स्वातन्त्र्ये जड़ताहानिः, नादृष्टं दृष्टघातकम् ।
हेत्वभावे फलाभावः, विशेषस्तु विशेषवान् ॥४॥

न हि कर्त्तारं हेतुं विना कार्य्यं । परमाणोरेव प्रयत्नवत्त्वे तथा नुपपत्तिः, अचेतनस्य चेतनप्रेरितस्यैव जनकत्वात् । अदृष्टमपि दृष्टकारणसहकारित्वेन फलजनकम् । न च चेष्टायामिव भोक्तृ

पयन्तस्य नियमार्थं कथ्यात् । टीकायाम् आश्रयविरहा इति आश्रयविरहा अनवधानस्य विषयता, आमास्य जन्य्‌सामान्यविषयकपरिशोधका, प्रभाव आश्रयतयोनियतत्वाभाव-विषयता, आमास्य जन्य्‌सामान्यविषयकपरिशोधका । अनीश्वरस्य जन्य्‌स्वाभावसाधकानुमानस्यापि विधि । इत्यागमश्चेति उपकारक इति पूर्वेणान्वय । आर्षमिति, आर्षे वेद धर्म्मोपदेश स्मृत्यादिकम् । तस्मात् कल्पसूत्रागमस्य प्रामाण्यनिश्चय भाव, आर्षमिति, तर्कसहकृतानुमानस्य तर्काविषयीकृतागमस्य तर्कानुगृहीतत्वेऽपि तर्कसहकृतत्वेऽपि, तथाच तर्कसहकृतागमस्य तर्काविषयीकृतागमस्य दुर्बलत्वमिति भाव ॥ ३ ॥

कार्य्यत्वं कर्त्तृ, तत्र प्रयत्नजन्यं कर्म्मं स्यादिति प्रयुक्तादिविषयीभवनस्य हेतुभूतप्रयत्न प्रयत्नेनैव सिद्धिरिति यत् पूर्वमुक्तं तत्र कर्म्मत्वे अप्रयोजकत्वमाशङ्कते, अनित्यपरिणामेन कार्य्यत्वमिति कर्म्मत्वमित्यर्थः, सर्वादायास्तीत्यचेतनक्रियाहेतुत्वम् प्रथम परमाणोरेवास्तु अथ वा प्रयत्न विना अदृष्टादेव तत्कर्मास्तु किं वा चेष्टाद्यविषयविशेषो भोक्तृप्रयत्नविशेष कल्प्योऽस्तु, न तु क्रियामात्रम् प्रयत्नप्रयोजकत्वहेतुमूलदोषत्रयं क्रमेण निरस्यति कारिकायां स्वातन्त्र्ये इति स्वातन्त्र्ये परमाणौ प्रयत्नवत्त्वे जड़ताहानि अचेतनत्वहानि, एवेन प्रथमदोषनिरासः ।, अदृष्टं न दृष्टघातकं न प्रयत्नादिदृष्टकारणपरित्यागेन कार्य्यजनकम्, अदृष्टादेव सर्वेषु कार्य्येष्वादि दृष्टकारणीभूतहाननं । एवेन द्वितीयदोष

प्रयत्नो हेतुः, न तु क्रियासामान्ये इति, चेष्टाया विशेषप्रयत्नस्य हेतुत्वेऽपि क्रियासामान्ये प्रयत्नसामान्यस्य कारणत्वानपायात्, अन्यथा बीजविशेषस्याङ्कुरविशेषे जनकत्वेनाङ्कुरसामान्यं प्रति बीजत्वेन हेतुताया अपि विलोपापत्तेः ॥ ४ ॥

ननु धृत्यादीनां प्रयत्नजन्यत्वे किं मानमित्यत आह ।

कार्यत्वान्निरुपाधित्वमेवं धृति-विनाशयोः ।
विच्छेदेन पदस्यापि प्रत्ययादेश्च पूर्ववत् ॥ ५ ॥

धृति विनाशयो प्रयत्नजन्यत्वान्निरुपाधित्व । विच्छेदेनान्तरा

निपात । ननु [illegible] आह, हेतुमात्र इति, अन्वय-व्यतिरेकाभ्यां घटादौ दण्डादेरिव कार्यमात्रे [illegible] हेतुत्वग्रहात् तदभावे [illegible] प्रतीत्यर्थः । विशेषस्तिति [illegible] तथाच [illegible] सामान्य [illegible] हेतुत्वसिद्धिरिति भाव । अन्यथा [illegible] इति हेतुत्वविलयापत्ते । टीकायां [illegible] तेन [illegible] हेतुत्वनाश, कार्यमिति तथाच [illegible] भाव । [illegible] इत्यर्थीति, तथाच प्रयत्नाभावे [illegible] मिति भाव ॥ ४ ॥

[illegible] प्रयत्नजन्यत्वे [illegible] किं मानमिति तथाच [illegible] इति भाव । कार्यत्वात् कार्यत्वादित्यादि [illegible] पूर्वोक्तरीत्या क्रियासामान्य-प्रयत्नसामान्ययो कार्यकारणभावसम्भवादिति [illegible] धृति विनाशयो [illegible] विनाशसामान्ययो [illegible] निरुपाधिकत्वम् [illegible] कार्य्यकारणभावग्रहणम् [illegible] भाव । पदस्यापीति कार्यत्वाविशेष [illegible] कार्य्यत्वात् [illegible] निरत्ना

प्रत्येन प्रादर्शाद्यभावात् सर्वाग्दर्शी नाद्यव्यवहारमूलं व्यवहारानभिज्ञत्वादिति सर्गाद्यकालीनघटादिव्यवहारप्रवर्त्तकः पुरुषः सिध्यति। एवं प्रत्ययादेर्वेदजन्यधीप्रामाण्यादेरपि निरुपाधित्वम्। यद्वा कार्य्येत्यादिकमन्यथा व्याख्यायते। कार्य्यं तात्पर्य्यं, तात्पर्य्यविषय एव शब्दप्रामाण्यमिति तात्पर्य्यं हि यस्य वेदे स एवेश्वरः। आयोजनं व्याख्यानं, वेदाद्यर्थविज्ञाख्याता महाजनपरिगृहीतवाक्यत्वात् अव्याख्यातत्वे पदार्थानवगमेऽननुष्ठानापत्तेः,

---

त्विम् व्यभिचरितत्विमत्य। अत्रप्रमाविषटादिव्यवहार पूर्वपूर्वकुम्भादि प्रयुक्त एव भविष्यति किमीश्वरेणेत्यत आह, विच्छेदेऽपि प्रलये विच्छेदस्य व्यवहारी न घटादिरपस्य सर्गादौ तद्व्यवहारकर्त्तृत्व अविच्छेदेऽपि इति भाव। प्रत्ययादेर वेदजन्यधीप्रामाण्यादेः निरुपाधित्वं पूर्ववत् आप्तकारणभावकत्वग्रहणतत्त्वादि शाब्दप्रमायां प्रकृतकार्यत्वादिना व्यवहारप्रमादिति भाव। प्रत्ययादित्यादि पदेन स्तुति सङ्ख्याविशेषपरिग्रहः। टीकायाम् प्रादर्श्यभावात् व्यवहारदर्शनाभावादि त्यर्थः, सर्वाग्दर्शी पूर्वव्यवहारदर्शी, आद्यव्यवहारमूल नाद्यव्यवहारकर्त्तृत्व इत्यर्थः, तत्र सिद्धसाधनाभावादिति भाव।

वेदप्रामाण्याभ्युपगन्तृमीमांसकं प्रति परमेश्वरस्वीकाराय कार्य्यायोजनेत्यादिकारिकामन्यथा व्याख्याति प्रतिज्ञायत इत्यादि कार्य्यमिति कार्य्यत्वम् उद्देश्यत्वम् उद्देश्योऽभिप्राय स एव तात्पर्य्यमिति कार्य्यपदस्य तात्पर्य्यपरत्वं, तात्पर्य्यमिति यदेव परम् उद्देश्यमिति स्फुटत्वा प्रवृत्तेः स शब्दः प्रयुज्यते स तत्परः तत्र भाव तात्पर्य्ये तत्र इच्छा सत्येति स्फुटत्वा प्रयुक्तेऽपि स शब्द प्रयुज्यते स तत्परः तत्र भाव तात्पर्य्यं तत्र इच्छा विशेष। अतएव प्रकृतशास्त्रे प्रतिविधुद्दिश्य प्रयुज्यते इति तत् तात्पर्य्य निरुपाधिकत्व विशेषं। तात्पर्य्यविषय एवेति एतदाकारम् एतदर्थं निरतिशयोद्दिश्य प्रयुज्यते तद्विशेषपदरूपमिति। तात्पर्य्यविषयवाक्यार्थं एवेत्यर्थः, शब्दप्रामाण्यं विशेषणेऽद्भुतप्रकारकबोधो भवतीति प्रकृततात्पर्य्यविषयवाक्यार्थं एवेत्यर्थः, शब्दप्रामाण्यं शब्दनिष्ठप्रामाण्यं तत्र तात्पर्य्यविषयवाक्यार्थविषयकशाब्दबोधजनकत्वं, निरुक्तार्थेकार्थ निरुक्तवाक्यार्थं प्रामाण्यव्यवहारभावात्। एतावत्तात्पर्य्यस्य सूचकता सदृशत्वमनुपपत्त्या तात्पर्य्येण सदुपायेन योग्यतायां बोधजनकत्वमिति ज्ञानाकाङ्क्षादि प्रामाण्यमाह प्रमाणाद्भवनादिरूपा कारणम् तात्पर्य्यमिदं सूचकतात्पर्य्यपरम्, एवञ्च वह वक्तात्पर्य्यक इत्याद्युपपादितम्

एकदेशदर्शिनश्च व्याख्याया नाश्वासः । एवं धृतिधारणं, धृत्यादेरित्यादिग्रहणात् अनुष्ठानसंग्रहः । एवमीश्वरादिपदार्थतया ईश्वरसिद्धिः । तदुक्तम् "उद्देश एव तात्पर्यं व्याख्या विश्वद्रुधः सती । ईश्वरादिपदं सार्थं लोकवृत्तानुसारतः." । उद्देशः, इच्छाविशेषः । एवम् "यद् सर्वस्य प्रभवः" इत्यादावपि पदं स्वतन्त्रोच्चारयितृपरं, लोकवत् सतात्पर्यकशब्दस्यैव प्रमाणत्वात् "य एव लौकिकास्त

न्येन वेदे तात्पर्यविरहाव्याख्यातात्पर्यमादाय न विप्रलम्भेन प्रमादिरत्नस्यतन्तुपुरुषतात्पर्यमेव प्रामाण्यप्रयोजकमन्त्र [illegible] । स परमेश्वर इति तद्वचनं सकलवेदार्थदर्शित्वादिति भावः । न च यद्वै [illegible] व्याख्यामिति वाच्यम् । यथार्थं यदर्थं प्रमाणान्तरविषयं तद्वाक्यं [illegible] विषयतद्बाधकमिति [illegible] यद्वै तदर्थविषय [illegible] त्वात् कथञ्चित्सिद्धम् । न [illegible] तात् पर्यन्त [illegible] तात्पर्यमीय [illegible] विरिति वाच्यम् । [illegible] वाक्यान्तर [illegible] इति तात्पर्यस्य [illegible] । अतएवास्तात्पर्यं हि यत्र यद्वै स परमार्थ इति, पदसमुदायस्यापि बोध्यम् । [illegible] मपीन ज्ञातम् इति [illegible] व्याख्यापरत्वम् । तदर्थविषय [illegible] [illegible] महाजनपरिग्रहीतत्वात् महाजनानुरोधमात्र विषयीभवत्वादिव । एकदेशदर्शिन इति यदेकदेशदर्शिना [illegible], [illegible] न विश्वासः । [illegible] वेदाध्ययनमिति शास्त्रम्, तथाच "स्वाध्यायोऽध्येतव्य" इति श्रुतिमूलकं वेदाध्ययनं [illegible] विदितमेवान्यथा [illegible] ईश्वरसिद्धिरिति भावः । धृत्यादेरित्यादिपदग्रहणात् [illegible] इति, [illegible] उपासनं, तदाचार्य [illegible] उपासनं [illegible] इति । [illegible] ज्ञानविषय, तथाच यदा [illegible] [illegible] वा ते [illegible] । एवं [illegible] [illegible] [illegible] यथादिदर्शिनामपीति वदन्ति । ईश्वरादि

एव वैदिका." इति लौकिकात्वसादिपदवदलौकिकेऽप्ययमेव व्यवस्था। प्रत्ययत. विधिप्रत्ययात्, आप्ताभिप्रायोविध्यर्थः, यस्याभिप्रायः स एवेश्वरः ॥ ५ ॥

प्रवृत्तिः कृतिरेवात्र सा चेच्छातः, यतश्च सा।
तत् ज्ञानं, विषयस्तस्य विधिः, तज्ज्ञापकोऽथ वा ॥६॥

विधिजन्यज्ञानात् प्रवृत्तिर्दृश्यते, सा च इच्छातश्चिकीर्षातः, चिकीर्षा च कृतिसाध्यत्वेष्टसाधनताज्ञानात्, तज्ज्ञानस्य विषयः कार्य्यत्वम् इष्टसाधनत्वञ्च विधिरिति प्राचीनमतम्। नवनमते

यदार्थरीति, तथाचाय यद्येन ईश्वरस्य [illegible] यस्यैव वेदबोधितत्वादिति, तथाच श्रुतिः "यतो वा इमानि भूतानि जायन्ते" इत्यादि। तदुक्तमिति, सूत्रकारैर्हि [illegible] इति तदुक्तमित्यनेन प्रमाणोपन्यासो [illegible] प्रतीयत इति, तथाच [illegible] [illegible] [illegible] प्रतिभाति। [illegible] इति, तथाच [illegible] इष्ट [illegible] एव वेदे तात्पर्ये न आयत्त, एवं [illegible] लोकव्यवहारात् सतो [illegible] निर्दोषमिति यावत् इति पूर्वोक्त तात्पर्यम्। [illegible] तथाचाय यस्यैव [illegible] [illegible] [illegible] [illegible] लौकिकवाक्यवदिति। स एव [illegible] एव, [illegible] [illegible] [illegible] लौकिकवाक्यवदाप्तवाक्यत्वात् वैदिकवाक्यमपि स एव [illegible] एव। [illegible] [illegible] लौकिकवाक्यत्वाद् इति चेत्, [illegible] [illegible] [illegible] इति वैदिकविध्यर्थ इति चेत्, [illegible] लौकिक [illegible] "[illegible]" [illegible] [illegible] [illegible] ॥ ५ ॥

[illegible] प्रवृत्तिरेव इति प्रवीणात् [illegible] [illegible] प्रवृत्तिरप्यत्र तथापि विधि [illegible] कृतिरेव प्रवृत्तिरत्र इच्छाभावेन [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] तत्रो नार्थे दोष [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इत्यर्थ, [illegible] [illegible] [illegible] [illegible] [illegible]

तज्ज्ञापकोऽथ वेति। इष्टसाधनत्वानुमापक आप्ताभिप्रायो विधिप्रत्ययार्थ ॥ ६ ॥

प्रवृत्तिप्रयोजकेच्छाहेतुज्ञानविषयं परिशेषयति,—

इष्टहानेरनिष्टाप्तेरप्रवृत्तेर्विरोधतः ।
असत्त्वात् प्रत्ययत्यागात् कर्त्तृधर्मो न सङ्गरात् ॥७॥

अन्यस्य कर्त्तृधर्मस्य प्रवृत्तिप्रयोजकत्वे 'ध्यायन् विजानीयादि' त्यत्राप्रवृत्तिप्रसङ्गात् ग्रामं गच्छतीत्यत्र प्रवृत्त्यापत्तेश्च। यत्नस्य विधित्वे दोषमाह, 'अप्रवृत्ते', आख्यातान्तरेण यत्ने बोधितेऽपीष्टसाधनत्वाप्रतिसन्धाने अनिष्टसाधनत्वज्ञाने वाऽप्रवृत्ते। इच्छाया विधित्वे दोषमाह विरोधत इति। इच्छाया विधित्वे इच्छैव तज्ज्ञानं जननीयम्, इच्छाया ज्ञानेन चेच्छा जननीया, इत्यन्योन्या

इतिसाध्यर्थं विधिरितीति विधिप्रत्ययार्थं इत्यर्थः, इष्टसाधनत्वानुमापक इति तथाच इष्टसाधनत्वव्याप्यत्वमप्यस्य न विध्यर्थत्वम् अनन्यथा [illegible] इति नियमात्, आप्ताभिप्रायस्य अनन्यथासिद्धत्वात् [illegible] भावः ॥ ६ ॥

प्रवृत्तीति प्रवृत्तिप्रयोजकचिकीर्षाहेतुज्ञानस्य कृतिसाध्यत्वेष्टसाधनत्वविषयकत्वं पर्यवसितं विचारयतीत्यर्थः, [illegible] विरहस्य कर्त्तृधर्मस्य विधित्वे दोषमाह इत्यादि। टीकायां कर्त्तृधर्मत्वादि न च अन्यस्य [illegible] कर्त्तृधर्मत्वमिति भाष्यम्। [illegible] कर्त्तृधर्मे विधित्वात्। प्रवृत्तिप्रयोजकत्व विषयतया [illegible] कर्त्तृधर्मत्वमिति इष्टहानेरित्यस्य विवरणं तथाच ध्यायन् विजानीयादित्यत्र [illegible] इति भावः। अप्रवृत्तेरित्यस्य विवरणं [illegible] इति भावः। यत्नेति [illegible] आख्यातान्तरेण [illegible] इच्छाया विधित्वे [illegible] इत्यर्थः, इत्यन्योन्याश्रय इति [illegible] प्रवृत्तिजनिकेति नियमात् [illegible] विधेयं

ग्रयः, तदिदमुक्तं विरोधत इति। नन्विच्छाज्ञानं लिङा जननीयम् इत्यत आह, असत्त्वादिति। इच्छाज्ञाने जाते प्रवृत्तिहेतुस्वरूपसदिच्छाऽभावात् प्रवृत्तिर्न स्यात्, इच्छायाः स्वरूपसत्या एव प्रवृत्तिहेतुत्वात्। न च लिङ्श्रवणकाले इच्छा स्वरूपसतीत्यतः। ननु लिङेव इच्छाजनिका इत्यत आह, प्रत्ययत्यागादिति। इच्छाकारणत्वेन गृहीतस्य प्रत्ययस्य ज्ञानस्य कारणस्य त्यागापत्तेः व्यभिचारादित्यर्थः। लिङ्स्मृतिकाले सुप्तत्वादिप्रकारकधीजन्येच्छासिद्ध्यर्थं इत्यत आह, सद्वरादिति। इष्टसाधनताज्ञानस्य उपायेच्छाहेतोरवश्यं स्वीकारात् तत्र च कारणान्तराभावात् लिङ्पदमेव कारणम्, अतः फलेच्छाज्ञानं न प्रवृत्तिहेतुः तद्विनापि प्रवृत्तिसम्भवात्। तथाच सद्वरादिष्टसाधनत्वज्ञानरूपसाधनसहचारत्वात्, इच्छाज्ञानस्य इच्छाजनकत्वे मानाभावेन तस्य लिङ्पदजन्यत्वे मानाभावादिति ॥ ७ ॥

[illegible] लौकिकमानसप्रत्यक्षरूपमिति तत्र लौकिकमानसरूपे, इच्छादर्शनविषयज्ञानस्य [illegible] इति भावः। लिङा जननीयमिति [illegible] इच्छा [illegible] इति भावः। [illegible] लौकिकमानस एव विषयत्व हेतुत्वेन [illegible] तथाच स्वरूपसदिच्छायाम् इति भावः। प्रवृत्तिर्न स्यादिति [illegible] विवरणं, तथाच [illegible] इच्छाज्ञानस्य न हेतुत्वमिति भावः। इच्छाजनिकेति इच्छाजनकतावेति [illegible] इष्टसाधनताज्ञानस्य कारणत्वे [illegible] व्यभिचारादिति [illegible]। [illegible] इच्छोत्पत्तौ कारणान्तरं [illegible] व्यभिचारादित्यर्थः। [illegible] इति हेतुः इति, [illegible], लिङ्स्मृतिकाले इति, सुप्तत्वादिप्रकारकधीजन्ये [illegible] इत्यर्थः, तथाच लिङा [illegible] तत्र [illegible] इति भावः। तत्र च इष्टसाधनतायां च कारणान्तराभावात् [illegible] लिङ्पदातिरिक्तकारणाभावात्। ननु [illegible] कारणत्वे [illegible] ज्ञानहेतुत्वं न [illegible] तद्विनापीति [illegible] विवरणम्, [illegible] इष्टसाधनताज्ञानरूपसाधनसहचारत्वादिति [illegible]

ननु यत्नज्ञानमेव प्रवर्त्तकमस्तु आख्यातान्तरञ्च न यत्नवाचकम्, फलानुकूलव्यापारमात्र एव आख्यातशक्ते रथोगच्छतीत्यादौ तथा कल्पनात् तत्राह,—

कृताकृतविभागेन कर्तृरूपव्यवस्थया ।
यत्न एव कृतिः, पूर्वा परस्मिन् सैव भावना ॥ ८ ॥

घट कृतोऽङ्कुरो न कृत इति व्यवहारात् कुलालादि कर्त्ता न कारकान्तरमिति व्यवस्थात्, कृतिः । ननु यत्नपदपर्य्यायता स्यादत आह, पूर्वेति परस्मिन्नुत्तरकालवर्त्तिनि फले विद्यमाने सैव कृतिरेव पूर्वा साधनीभूता भावना, फलानुकूलतापन्नयत्न एवाख्यातार्थः । यद्वा फलानुकूलव्यापारधात्वर्थप्रयत्नजनिका पूर्वा

[illegible] उपसंहरति इच्छाजनकज्ञान-गोचर इति । ७ ।

आख्यातान्तरञ्चेति यत्नाभिधायकं तथाच कार्यं गच्छतीति वाक्यस्य यत्नावि-षयत्वात् प्रवर्त्तकत्वमिति भावः । कारिकायां कृताकृतविभागेनेति घटः कृत अङ्कुरो न कृत इति विभागेन या व्यवस्था कर्तृत्वस्य ईश्वरे प्रतिनियतत्वम् यत्न एव कृति-पदेनैवेत्यर्थः ननु यत्नस्य [illegible] आह कारिकायां पूर्वेति, परस्मिन् उत्तरकालवर्त्तिनि फले पूर्वा साधनीभूता सैव कृतिरेव भावना भाव्यते यया सा भावना इति व्युत्पत्त्या भावनापदवाच्या इति समुदितकारिकार्थः । टीकायां घटः कृत इत्यादि तथाच क्रियाजन्यफलविशेषेऽपि [illegible] घटाङ्कुरयोः कृताकृतव्यवहारात् कुलालादिरेव कर्त्ता नार्थः, न कारकान्तरमिति न दण्डचक्रादि कारकान्तरमित्यर्थः तथाच यदि व्यापारमात्रस्य कर्तृत्वं तदा दण्डचक्रादिव्यापार-वत्त्वे कार्यजनकत्वात् दण्डचक्रादेरपि कर्त्तृत्वव्यवहारः स्यादिति भावः । फलानुकूलता-पन्नयत्न इत्येव तथाच [illegible] इदं यत्नत्वम्, आख्यातस्य [illegible] इति [illegible] यत्नपर्य्यायमिति भावः । ननु [illegible]

यस्मिन् पूर्वापरीभूतत्वे सति, कृतिराख्यातार्थः, तथाच प्रयत्नस्व-मनुकूलत्वं पूर्वापरीभूतत्वमिति वयमर्थः ॥ ८ ॥

ननु धातुना यत्नः प्रतीयते, आख्यातस्य च अनुकूलव्यापार-मात्रार्थकत्वम्, आक्षेपादेव च यत्नलाभ इत्यत आह,—

भावनैव हि यत्नात्मा सर्वाख्यातस्य गोचरः ।
तथा विवरणध्रौव्यादाक्षेपानुपपत्तितः ॥ ९ ॥

तया कृत्या तद्वाचकपदेन, पचति पाकं करोतीति विवरणात् तत्र शक्तिः। अनुकूलव्यापारस्य यत्नानाक्षेपकत्वात्। वर्तमान

[illegible] आह, यदीति, पूर्वापरीभूतत्वे सतीति, तथाच पूर्वापरीभूत[illegible] [illegible] पूर्वापरीभूत[illegible] [illegible] सतीति [illegible] [illegible] [illegible] न तु [illegible] [illegible] इति [illegible] ॥ ८ ॥

इति भाष्यम्। [illegible]

धातुना [illegible], अनुकूलव्यापार[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इति [illegible]

पाकानुकूलव्यापारस्याचेतनेऽपि भावात्। 'ओदनमिति' कर्मपदोत्तरं पचति भुङ्क्ते वेति जिज्ञासा च। कर्मणः कृतिव्याप्यत्वप्रतिसन्धानेन यथा पचतीत्यनन्तरं कर्मादौ जिज्ञासा ॥ ९ ॥

ननु कर्त्तुरपि विवरणात् तत्रापि शक्तिराख्यातस्य स्यात् तत्राह,—

आक्षेपलभ्ये संख्येये नाभिधानस्य कल्पना।
संख्येयमात्रलाभे तु साकाङ्क्षैव व्यवस्थितिः ॥ १० ॥

आख्यातवाच्यया संख्यया आश्रयस्य आक्षेपादेव लाभात् कर्तरि शक्तिकल्पना। प्रथमान्तपदोपस्थाप्यत्वे सति आख्यातार्थविशेष्यत्वमाक्षेपलभ्यत्वम्। सुप्ता इत्यादौ आख्यातार्थानन्वयवार-

---

कर्मपदस्य पचधर्मितव्यापारजन्यफलविशिष्टबोधकतया व्यापारसामान्योपस्थापकत्वात् 'व्यापारसामान्योपस्थितौ व्यापारविशेषजिज्ञासाजननात्' इत्याशयात्तदेवानुमाह, ओदनमितीति, तथाच कर्मपदस्य पचघटितार्थानुपस्थापकत्वेऽपि कर्मपदार्थस्य कृतिव्याप्यत्वप्रतिसन्धानेन कृतिसामान्योपस्थित्या कृतिविशेषजिज्ञासोत्पत्तिरिति भावः। एतदेव द्रढयति यथेत्यादिना, कर्मादौ जिज्ञासा ओदनं तेमनं वा इति कर्मविशेषजिज्ञासेत्यर्थः। तथाच आख्यातस्य कर्माद्यनुपस्थापकत्वेऽपि आख्यातार्थकृतौ कर्मव्यापकत्वप्रतिसन्धानेन कर्मसामान्योपस्थित्या पचतीत्यनन्तरं यथा कर्मविशेषजिज्ञासा तथा ओदनमित्यनन्तरं कर्मणि कृतिव्याप्यत्वप्रतिसन्धानेन कृतिसामान्योपस्थित्या कृतिविशेषजिज्ञासेति भावः ॥ ९ ॥

विवरणादिति पचतीत्यस्य पाकं करोतीति विवरणादित्यर्थः। कारिकायां 'आक्षेपलभ्य' इत्यादि, संख्येये संख्याश्रये कर्तरि, नाभिधानस्य शक्तेः कल्पना, 'तथाऽनन्यलभ्यः शब्दार्थः' इति नियमात् कर्तुरनाख्यातपदवाच्यत्वम्। ननु आख्यातपदप्रतिपाद्यसंख्यायाः कर्त्रैवान्वयः न तु कर्मणि इति नियमः कथमुपपद्यते इत्याशङ्क्याह, 'संख्येयमात्रलाभे' इत्यादि, तुरर्थे, संख्यान्वयस्येव संख्याश्रयस्य कर्तुः कर्मणो वा लाभसम्भवेऽपीत्यर्थः, साकाङ्क्षैव 'आकाङ्क्षावशादेव, आकाङ्क्षायोग्यतानुरोधानुपूर्वीनियमादपेक्षितार्थेनैव कर्त्रा, व्यवस्थितिः संख्यान्वयनियमः,' तथाच कर्तृ आकाङ्क्षा

पाय विशेष्यदलम्। सूयते इत्यादौ वर्त्तमानत्वविशेषत्वं स्याप-
स्यापीति सत्यन्तदलम्। चैत्रस्तण्डुलं पचतीत्यत्र द्वितीयार्थकर्मता-
वद्दत्वात् तण्डुलस्य, न तत्र भावनाकाङ्क्षेति भावना शुद्धप्रातिपदि-
कार्थान्वयिनी। अतएव यं यं भावनाऽन्वेति तं तं संख्यापीति,
एकपदोपात्तभावनान्वयबलात् कर्त्रादिसंख्याभिधान एव प्रथमेति।
एवं कर्मापि नाख्यातपदवाच्यम्॥ १०॥

[illegible] कर्त्रादि [illegible] संख्यायाः कर्त्रादि, [illegible]
तत्रैव संख्यान्वयनियमात् [illegible]।

[illegible] इति नियम इति [illegible]।

टीकायां [illegible] [illegible]। ननु [illegible]
[illegible], न तावत् [illegible], [illegible]
[illegible] [illegible], [illegible], [illegible] विशेष्य
[illegible] इति सूत्रेण [illegible]
[illegible] भाव। भावनान्वयी [illegible] [illegible]
[illegible] [illegible] इति भाव। ननु [illegible]
विशेष एव भावनान्वयनियमेन [illegible] [illegible]
[illegible] [illegible] [illegible]। [illegible] चैत्र [illegible] पचतीत्यत्र चैत्र
[illegible] [illegible] भावनायाम्
[illegible] [illegible] [illegible] [illegible]
[illegible] भावनान्वि, न [illegible], [illegible]। [illegible]
[illegible], न हि [illegible] [illegible] किन्तु [illegible]
[illegible] [illegible] भावनान्वय [illegible]
[illegible] [illegible]। [illegible]
[illegible] [illegible] [illegible] [illegible]
[illegible]। ननु [illegible] [illegible]
[illegible] [illegible] इति भाव। ननु
[illegible] [illegible]

नन्वस्तु कर्मधर्मो विधिः, तत्राह,—

अतिप्रसङ्गान्न फलं नापूर्वं तत्त्वहानितः ।
तदलाभान्न कार्य्यञ्च न क्रियाऽप्यप्रवृत्तितः ॥ ११ ॥

धर्मं स्वर्गादि, तद्धर्मः कार्य्यत्वं यदि विध्यर्थः तत्राह, अतिप्रसङ्गान्न फलम् । स्वर्गे कार्य्यत्वभाने सति स्वर्गासाधनेऽपि प्रवृत्त्यापत्तेः । यदि कर्म अपूर्वं, तद्धर्मः कार्य्यत्वं विध्यर्थस्तत्राह, नापूर्वं तत्त्वहानितः । शाब्दबोधात् पूर्वं नोपस्थितमित्यत एवापूर्वं, पूर्वमुपस्थितौ च न तत्त्वम्, अनुपस्थितौ च कथं तत्र शक्तिधीः । ननु कार्य्यत्वरूपेण शक्तिधीः, शाब्दबोधे तु योग्यतया अपूर्वस्य कार्य्यविशेषस्य भानं तत्राह, तदलाभान्न कार्य्यञ्चेति । नित्यनिषेधापूर्वयोरलाभप्रसङ्गात् तत्र फलकामस्य नियोज्यस्याभावात् । यद्वा

व्याख्यातेन कुसुमाञ्जलौ "[illegible]" इति मूलस्य च [illegible] प्रथमा निर्वाह [illegible], [illegible] इति, तथाच [illegible] [illegible] [illegible] इति [illegible] भावः । [illegible] [illegible] [illegible] [illegible] [illegible], तथाच [illegible] [illegible] [illegible] न [illegible] इति भावः ॥ १० ॥

कर्मधर्म इति कर्मणो यागादीनां धर्मः कार्य्यत्वं विध्यर्थ इत्यर्थः, तत्राप्यतिप्रसङ्ग इति [illegible] कर्मपदेन यदि कर्म यागादि, तच्छिद्रकार्य्यत्वज्ञानं प्रवर्त्तकम्, अथवा कर्मपदेन स्वर्गकामनापूर्वे [illegible] प्रवर्त्तकम्, अथवा कर्मपदेन अपूर्वात्मकं यागादिकं, तच्छिद्रकार्य्यत्वज्ञानं प्रवर्त्तकमिति भावः । आद्ये दोषमाह, अतिप्रसङ्गा दिति, न कर्माणि [illegible] न विध्यर्थ इत्यर्थः । द्वितीये दोष माह, [illegible] कार्य्यत्वरूपेण शक्तिधीरिति कार्य्यत्वरूपेण घटादौ शक्तिग्रह इत्यर्थः, शाब्दबोधे इति [illegible] [illegible] इत्यर्थः, योग्यतया भान [illegible], तथाच [illegible] [illegible] कार्य्यत्वेन घटादौ [illegible]

नतु कार्य्यत्वेनोपलक्षितायामपूर्वव्यक्तौ शक्तिग्रहः, गन्धवत्त्वेनोपलक्षितायां पृथिवीत्वविशिष्टायां व्यक्तौ पृथिवीपदस्येव इत्यत आह, तदलाभात् । अपूर्वत्वविशिष्टापूर्वव्यक्त्यनुपस्थितेः, गन्धवत्त्वेनापि हि पृथिवीत्वविशिष्टस्य स्मरणमनुमानं वा सम्भवति, प्रागनुभवात्, प्रकृते तथात्वेऽपूर्वस्याव्याहतादित्यर्थः । ननु कर्म यागादि, तद्धर्मः कार्य्यत्वं विधिः, तत्राह, न क्रियाऽपीति । अनिष्टसाधनताधीकाले प्रवृत्त्यदर्शनात् । अत एव विना नापूर्वमपि, उक्तदोषादित्यर्थः ॥११॥

ननु कारणं शब्दः तद्धर्मोऽभिधा, तज्ज्ञानं प्रवर्त्तकम् । अत एवाहुः, "अभिधां भावनामाहुरन्यामेव लिङादयः । अर्थात्म-

---

इत्यत्र वाच्यताबलेन कार्य्यतया प्रकारत्वमपूर्वस्य सिद्धमित्यनन्यगतिकत्वं इति भावः । किञ्च निषेधे च निषेध्यापूर्वमेवेति कल्पनानुपपत्तिरिति विधौ बलवत्त्वं तत्र मन्त्रीयादिवि निषेधे कामनाऽपूर्वोत्पत्तिनिमित्तसम्पदनित्यत्वं, तदाह कामनायां काम्यविशेषविशिष्टं याग्यादीना काम्यत्वप्रसङ्गात्, अपूर्वत्वस्य वाच्यतायाम्, किञ्च निषेधस्थले यथा-शक्तिज्ञानदिकस्य साधनत्वस्यानुपपत्त्या अपूर्वसम्बन्धस्य वाच्यतायाम् इति भावः । विधीयमानेति तथाच्चीपसम्बन्धेऽर्थं, साधेन अपूर्वकल्पनायां प्रमाणाभाव इति भावः । अपूर्वं वाच्यता प्रकारभावं वाचकं तथाच निरूपित प्रमाणत्वाभावात् कर्मेव अनुमानेन तत्त्वम् अपूर्वी, तथाच यदा पृथिवीपदस्येवेति, तदन्यपदनिमित्तं च तत्र निर्वाच्य इति भावः । पृथिवीत्वेन शब्द-प्रवृत्ती पृथिवीपदस्य इत्युपलक्षणविधया शक्तिग्रहे उपस्थाने अपूर्वं प्रकारे उपलक्षणः बोधः तथा कार्य्यं विधिप्रत्ययिति कार्य्यतोपस्थिती अपूर्वं तथाच शब्द-अपूर्वत्वेन अपूर्वस्य शाब्दबोध इति पूर्वपक्षतात्पर्यम् । प्रागनुभवादिति तथाच शब्द-बोध पृथिवीत्वेन पूर्वानुभवजनितसंस्कारेण स्मरणम् अनुमानं वा पूर्वदृष्टत्वाभि-लापस्थानेनानुमितेर्वा सम्भवात्, तदभावात् प्रकृतिनिमित्तस्य यथै अपूर्वस्याप्रसिद्धेः, प्रकृते तु तथात्वाभावात् पृथिवीत्वस्य च जातित्वेनाखण्डत्वात् तत्र व शक्ति सम्भवतीति प्रकृते तु अपूर्वत्वप्रतीतौ तथा न सम्भवतीति विवक्षिततात्पर्यम् । तदीयकल्पनापक्षे निषेधति अनिष्टसाधनता ॥ ११ ॥

अत्र कल्पनापक्षे निषेधति, गन्धवत्त्वादिवत्, कारणं शब्द इति शाब्दबोधकरणं शब्द इत्यर्थः, वाचकत्वपदस्य शाब्दबोधकरणत्वमिति प्रतीतेरिदम् । अभिधा शब्दनिष्ठव्यापार-

भावना लभ्या सर्वाख्यातस्य गोचरः ।" अभिधा योगप्रवर्त्तिका इति धीः शब्दादाख्यातार्थस्य उत्पादना उत्पत्त्यनुकूलव्यापाररूपेयमित्याह,—

असत्त्वादप्रवृत्तेश्च नाभिधाऽपि गरीयसी ।
बाधकस्य समानत्वात् परिशेषोऽपि दुर्घटः ॥ १२ ॥

[illegible]

अभिधायां मानाभावात्, अभिधायाः शब्दतोऽभिधानेऽपि प्रवृत्तेः। गरीयसी कल्पिता, लिङर्थत्वेति चेयः। ननु अन्यस्य लिङर्थत्वे बाधात् परिशेषेणाभिधा लिङर्थ इत्यत्राह, बाधकस्येति। प्रकृतेऽपि बाधकसम्भवात् ॥ १२ ॥

प्रवर्तनाया ज्ञानस्य कार्यत्वमनुमानवदेव कारणस्य सम्भवतीति भावः। प्रवर्तने [illegible] इष्टव्यापारत्वेन प्रवर्तनाया अनुगमसम्भवात्। भावना हि द्विविधा शब्दभावना अर्थभावना च, तयोरेव किं वेन कथञ्चिदनुगमसम्भवात्, तत्र च शब्दभावना शब्दनिष्ठव्यापारतया शब्दव्यापाररूपत्वाच्च, तदुक्तम्, "लिङोऽभिधा सैव च शब्दभावना भाव्या च तस्यां पुरुषप्रवृत्तिः।" [illegible] अन्यथैव [illegible] यदीयं प्रयोजना [illegible] द्वितीया च तस्या पुरुषप्रवृत्तिः। [illegible] पुरुषप्रवृत्तिरिति पुरुषगतविशेष [illegible] तस्या किं भाव्यनिष्ठाकाङ्क्षायामाह [illegible] प्रवर्तनाया [illegible] कारणत्वम् [illegible] इति [illegible] प्रवर्तनाया [illegible] अविषयः, [illegible] ताद्रूप्यात् [illegible] प्रयोजना [illegible] [illegible] अर्थवादादिको [illegible]। [illegible] च [illegible] [illegible] इष्टार्थतया [illegible] अनुगमत्वात्। न [illegible] [illegible] अर्थभावना तु [illegible] व्यापारः सम्भवति तदभावे च कारणाभावात् [illegible] इति। एवं पीवंभावादिप्रयोगादिभूतस्था- [illegible] तत्र च [illegible] करणत्वम्, स्वर्गं कामयमानः [illegible] यजेतेत्यत्र यागकरणक [illegible] [illegible] करणस्य [illegible] कर्तव्यतया [illegible], तथाच स्वर्गकामो यजेतेत्यत्र [illegible] स्वर्गोद्देशकयागादीतिकर्तव्यताकभावना [illegible] प्रयोजक [illegible] व्यापारत्वात् अन्य [illegible] इति भावः। यद्यपि [illegible] [illegible] [illegible] तथापि स्वर्गकर्म [illegible] किन्तु यागकारणत्वं, यागस्य [illegible] [illegible] यागत्वं [illegible] भावनाया [illegible] एव [illegible] [illegible] [illegible] [illegible] एव प्रवर्तनात्वम् [illegible] [illegible] [illegible] व्यापारविशेष कारणस्य अनिष्ट- [illegible]। न च [illegible] एव [illegible] [illegible] इति भावः। व्यापारविशेष कारणस्य अनिष्ट [illegible] कारणत्वं न तु प्रवर्तनात्वमिति भावः। [illegible] [illegible] व्यापारत्वेन [illegible] यथा [illegible] कारणस्य अनिष्टाभिधायक व्यापारत्वेन [illegible] यथा लिङ कारणस्य [illegible] [illegible] [illegible] [illegible] इति। शब्दस्य व्यापारत्वेन [illegible] [illegible] इति' वाच्यम्। व्यापारत्वेन [illegible] [illegible] एव [illegible] [illegible] इति, न च व्यापारविशेष कारणत्वं [illegible] अभिधत्वतया [illegible] अनुमितिकरणत्वमितिप्रमादो [illegible] [illegible]

ननु करणस्य यागादेर्धर्मं इष्टसाधनत्वं विध्यर्थोऽस्तु तत्राह,—

हेतुत्वादनुमानाच्च मध्यमादौ वियोगतः।
अन्यत्र क्लृप्तसामर्थ्यान्निषेधानुपपत्तितः॥ १२॥

विध्यर्थस्य इष्टसाधनतायाः हेतुत्वात् लिङ्गतयोपन्यासात्। न च स्वस्य स्वलिङ्गत्वमिति। अग्निकामोदारुणी मथ्नीयादित्युक्ते कुत इत्याकाङ्क्षायां वक्तारो वदन्ति, यतो दारुमथनमग्निसाधनमिति। अनुमानात् अर्थवादादिष्टसाधनताबोधानन्तरमपि विधेरनुमानात्। यदि चानुमितेनापि विधिना इष्टसाधनत्वमेव बोध्यं, तदा तदनुमानवैयर्थ्यम्। तरति मृत्युं तरति ब्रह्महत्यामित्यादौ मृत्यु-ब्रह्महत्यातरणकामोऽश्वमेधेन यजेतेति विध्यनुमानस्य सर्वतन्त्रसिद्धत्वात्। मध्यमादौ वियोगतः मध्यमोत्तमपुरुषयोः लिङ-

---

अभिधायकत्व इति अभिधा [illegible] इति [illegible]। न च [illegible] [illegible] इति [illegible]। [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible]। [illegible] पूर्वोक्तत्वात्। [illegible] अभिधाया [illegible]। [illegible] इति। १२।

[illegible] [illegible], [illegible], [illegible] [illegible] [illegible] [illegible] न [illegible] पूर्वोक्तम्। [illegible] [illegible], [illegible], तथाच [illegible] [illegible] [illegible] [illegible]। [illegible] [illegible] तु [illegible] [illegible] [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible] [illegible] इति [illegible], [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

इष्टसाधनतावियोगात्, कुर्याः कुर्यामित्यत्राप्यादिके प्रतीयते, आज्ञा। त्वभिप्राय एवेति प्रथमपुरुषेऽपि इच्छैवार्थः। अन्यत्र तु स-सामर्थ्यात्, अध्येषणादिलिङो इच्छावाचकत्वकल्पनात्। निषेधानुपपत्तिः, न कलञ्जं भक्षयेदित्यत्रेष्टसाधनत्वनिषेधस्य बाधितत्वात्। बलवदनिष्टाननुबन्धित्वं च न विध्यर्थः, श्येनेनाभिचरन् यजेत इत्यादौ तदभावात्। अप्रवर्तमानपुरुषस्य बलवद्द्वेषविषयत्वात् बलवद्द्वेषविषयदुःखजनकत्वसामान्याभावस्य बाधितत्वादिति ॥ १२ ॥

विध्यर्थत्वे कर्तव्यादेष विध्यनुभावकत्वमिति भावः। इष्टसाधनताविधीतादिति एव साधनतावीषकत्वादित्यर्थः। आज्ञादिकमित्यादिना व्यक्तमविवरण, कुर्या इत्यत्र आज्ञा, कुर्यामित्यत्र संकल्प विभाग। आज्ञा अभिप्राय एवेति, तथाच या यत्र(?)विधान मनुविदधानप्रवृत्त्याविति सा आज्ञा, या तु स्वगतं यत्नेन इच्छा सा संकल्प। अध्येषणादीत्यादिपदात् अनुज्ञा सम्प्रश्न प्रार्थनादौ परिग्रह। तौ तु पूजा सत्कारपूर्विका प्रार्थना, अतिक्रान्तानपेक्षिका अनुज्ञा, अभिधानप्रयोजनीया सम्पद, आशीच्छा प्रायेणा, प्रमाणत्वगमनाद्वी। इच्छावाचकत्वकल्पनादिति तथाच अध्येषणप्रयुक्तयोरात्म इच्छावाचित्वमव्यानेन प्रथमपुरुषेऽप्याज्ञाविषयेति बलवदनिष्टाननुबन्धीष्टसाधनत्व विधेयमीश्वराविषयमेव विधिसत्ता साधनादिति भावः। बाधितत्वादिति यथा प्रमाणस्य इति इष्टसाधनत्वेन इष्टसाधनत्वविषयकस्य बाधितत्वादित्यर्थः। न च न कलञ्जं भक्षयेदित्यादेर्विभेदके विशेषस्य एवाभ्यर्थी न तु मनवीविषयक इति वाच्यम्। नन्वनिष्ट लीडुक्षस्यानुपपत्त्या साहचर्यस्य सम्भवात्। इत्यपि अत्र विषयत्व तदभावस्थैव तथा नीरवद्यत्वमित्यर्थः तद्भावाद न कलञ्जभक्षणे ननु बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वमेव विध्यर्थं तद्भावश्च न कलञ्जभक्षणे बाधित इत्याह निषेधति, बलवदित्यादि, श्येनेनेति, अभीति कर्मणामभेदम, अभिचरण शत्रुवध कामयत्रित्यर्थ, तदभावादिति तथाच श्येनस्य शत्रुवधद्वारा नरकोत्पादकत्वेन बलवदनिष्टाननुबन्धित्वाभावादिति भावः। ननु बलवत्त्व बलवद्द्वेषविषयत्वं तथाच शत्रुवधार्थं श्येने अप्रवर्तमानपुरुषस्य बलवद्द्वेषाभावात् न तत्र विध्यर्थबाध इत्यत आह, अप्रवर्तमानपुरुषस्येति, अपि च इत्यादि, बलवद्द्वेषविषयत्वादिति इत्यनन्तरं बलवद्द्वेषविषयत्वादित्यर्थः ॥ १२ ॥

स्वमतमाह,—

विधिर्वक्तुरभिप्रायः प्रवृत्त्यादौ लिङादिभिः ।
अभिधेयोऽनुमेया तु कर्त्तुरिष्टाभ्युपायता ॥१४॥

प्रवृत्ति निवृत्तिविषये आप्ताभिप्रायः लिङादिभिः प्रत्ययैरभिधेयः, इष्टसाधनता त्वनुमेया । वस्तुतस्तु ईश्वरेच्छायां सर्वविषयक

कर्मादिधर्मस्य विध्यर्थत्वं निरस्य परिशेषेण प्रयोक्तृधर्मस्याभिप्रायस्य विध्यर्थत्वं व्यवस्थापयति स्वमतमाहेति । कारिकायां विधिरित्यादि, प्रवृत्त्यादावित्यादिपदेन निवृत्तिपरिग्रहः, तन्मध्य उद्देश्यत्वं, तथाच प्रवृत्ति निवृत्त्युद्देश्यकवक्त्रभिप्रायो विध्यर्थः स एव लिङादिप्रत्यये अभिधेय प्रतिपाद्य, कर्त्तुरिष्टाभ्युपायता तु कर्त्तुरिष्टसाधनता तु अनुमेया विधिवाक्यजन्यवक्त्रभिप्रायज्ञानस्य विध्यर्थरूपलिङ्गज्ञानजन्यानुमितिविषय इत्यर्थः, प्रयोक्तुः आप्तो मम स्वेष्टसाधनं मत्कृतिसाध्यतया नियमानत्वात् मन्यमानकृतिसाध्यतयेष्यमाणमत्प्रयोजनवदित्याकारकः । न च वैदे वक्तुरभावात् कस्येच्छा लिङा बोधनीयेति वाच्यम् । कर्त्तुर्निर्देष्टाया बोधने विधि सामर्थ्याभावात् विधेरेव वेदकर्त्तरि मानत्वादिति । स्वाभ्युपगते अवान्तर दर्शयति वस्तुतस्त्विति लिङ्गे नाथ इति आप्ते च्छाविषयत्वस्येश्वरेच्छाविषयत्वरूपस्य केवलान्वयित्व कल्पकभयोऽपि सत्त्वात्तथात्वस्य इत्यर्थः । न च अनुपस्थितेविहाय विधित्वमभिव्याहृतमन्य विशेषतयैवार्थमीति कल्पकस्याभाव ईश्वरमिच्छ इच्छेनान्वयबोध इति वाच्यम् । अन्यदनीश्वरस्येऽपि आप्ताभिप्रायविषयत्वस्य विध्यर्थस्य बलवदनिष्टाननुबन्धीष्टसाधन तानुमापकत्वात् बलवदनिष्टाननुबन्धीष्टसाधनत्वरूपसाध्यप्रयुक्ते कलञ्जभक्षणे आप्ताभिप्रायविषयत्वरूपविध्यर्थाभिचारिती सत्त्वात् व्यभिचारित्वात् । ननु बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वप्रकारकेच्छाविषयत्वमेव विध्यर्थं सदेव चानुमापकमिति न व्यभिचार इत्याह, बलवदनिष्टेति भोक्तव्यमित्यादौ तथाच बलवदनिष्टाननुबन्धीष्ट साधनत्वस्य विध्यर्थत्वसम्बन्धापेक्षया तस्य विध्यर्थत्वसम्बन्धे गौरवमिति भावः । न च शाब्दीमते बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वे नैवाह प्रति किन्तु प्रत्येकं विभिन्न प्रतियत्व कल्पनीया यदि नानात्वविषयत्वापेक्षया तादृशगुरुत्वमापद्यतेऽपि एव शक्तिकल्पने लाघवमिति वाच्यम् । नवीनमतेऽपि इष्टत्वस्य विशेषणविशेष्यभावाद्योगात्

स्त्वात् निषेधे बाधः, बलवदनिष्टाननुबन्धित्वेनेच्छायाः प्रकत्वे गौरव-
मिति प्राचीनमतमेव साधीयः ॥ १४ ॥

श्रुतेरित्यस्य व्याख्यान्तरमाह ।

कृत्स्न एव च वेदोऽयं परमेश्वरगोचरः ।
स्वार्थद्वारैव तात्पर्य्यं तस्य स्वर्गादिवद्विधौ ॥ १५ ॥

सर्वत्र वेदभागे ईश्वरः प्रतिपादितः, यज्ञो वै विष्णुः पशवस्त्वचक्षु-रित्यादिश्रुतिषु एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावा-पृथिव्यौ विधृते तिष्ठत इत्यादिषु च, न तु सिद्धार्थतया धर्मोपामन्यस्य तात्पर्य्यं, यथा स्वर्गनरकादिबोधकानां, तथा ईश्वरमुपासीतेति

बलवदनिष्टानुबन्धित्व [illegible] बलवदनिष्टाननुबन्धित्वप्रकारकेच्छाविषयत्वाभावेन बलवद-निष्टाननुबन्धित्वप्रकारकेच्छाविषयत्वे [illegible] कृतिसाध्यत्वप्रकार-केच्छाविषयत्वे च पृथक् शक्तिकल्पनस्यापत्तेः । प्राचीनमतमिति [illegible] स्वामानादिक विध्यर्थ इति मतमित्यर्थः । न चेष्टसाधनत्वस्य विध्यर्थत्वे न [illegible] भक्षयेदित्यत्र [illegible] बलवदनिष्टाननुबन्धित्वे च विधे पृथक् शक्ति-कल्पनाद् । इष्टसाधनत्वे कृतिसाध्यत्वे बलवदनिष्टाननुबन्धित्वे च [illegible] न तर्हि [illegible] कृतिसाध्यत्वं न [illegible] इष्टसाधनत्व, [illegible] विध्यर्थः तथा [illegible] बलवदनिष्टाननुबन्धित्व विध्यर्थ कृतिसाध्यत्व, न [illegible] भक्षयेदित्यत्र [illegible] भाव । न च इष्टसाधनत्वस्य [illegible] इति न [illegible] विध्यर्थत्वादेव विध्यर्थत्वे [illegible] विधिविषय [illegible] च [illegible] ॥ १४ ॥ [illegible] वेदोऽयं कृत्स्न एव सर्वं एव, परमेश्वर-गोचरः [illegible] "यस्य दृश्येन सन्निधम्" [illegible] [illegible] श्रुति "यज्ञो वै विष्णुः" इत्यादिश्रुतिवेदवाक्यस्य, [illegible]

विध्येकवाक्यतया तेषां स्वार्थेऽपि प्रामाण्यमेव अन्यथा स्वर्गादिपदानामपि स्वार्थे प्रामाण्यं न स्यात्, तदेतदुक्तं स्वार्थद्वारेवेति। स्वार्थप्रतिपादनद्वारा एव विधौ सिद्धार्थतात्पर्य्यात्। वाक्यात् वैदिकप्रशंसा निन्दावाक्यानि प्रशंसा निन्दाज्ञानपूर्वकाणि प्रशंसा निन्दाप्रतिपादकवाक्यत्वात् परिणतिसुरसमाम्रफलमित्यादिवत् ॥ १५ ॥

संख्याविशेषादित्यस्य व्याख्यान्तरमाह।

स्यामभूवं भविष्यामीत्यादौ संख्या प्रवक्तृगा।
समाख्यापि च शाखानां नाद्यप्रवचनादृते ॥ १६ ॥

वैदिकोत्तमपुरुषेण स्वतन्त्रोच्चारयितृसंख्या वाच्या, यद् पिबत एकोऽहं बहु स्यामित्यादिबहुषु उत्तमपुरुषश्रुतेः। संख्यापदार्थमन्य

[illegible]

माह समाख्येत्यादि । सर्वासां शाखानां हि काठककालापकाद्याः समाख्याः संज्ञाविशेषाः श्रूयन्ते, ते च नाध्ययनमात्रनिबन्धनाः, अध्येतृणामानन्त्यात् आद्यैरन्यैरपि तदध्ययनात्, तस्मादतीन्द्रियार्थदर्शी भगवानेव कारुणिकः सर्गादावस्मदाद्यदृष्टाकृष्टकाठकादिशरीरविशेषमधिष्ठाय यां शाखामुक्तवान् तस्याः शाखायास्तन्नाम्ना व्यपदेश इति सिद्धमीश्वरमननं मोक्षहेतुः ॥ १६ ॥

यस्येश्वरे न विश्वासस्तं प्रत्याह ।

तुल्ये वै श्रुति-नीतिसंप्लवजलैर्भूयोभिराक्षालिते

येषां नास्पदमादधासि हृदये ते शैलसाराशयाः ।

माह, समाख्यापि भवि, शाखानां कठकालापादिरूपा च, शाखाप्रवचनाद्दते च्यादौ सर्गादौ प्रवचनादृते कस्यचित् अतीन्द्रियार्थदर्शिनः शक्तिं विना, 'न' न सम्भवतीत्यर्थं, इति कारिकातात्पर्यम् । टीकायां संज्ञा शाखेति, तथाच शाखाकारणत्वेन ईश्वर सिद्धिं दर्शयित्वा ... ईश्वरसिद्धिरित्यर्थः । नाध्ययनमात्रनिबन्धनेति येन शाखा यदधीता तन्नाम्नैव शाखा व्यपदेश्या इति न नियम इत्यर्थः, अध्ययननियमे दोषमाह, अध्येतृणामानन्त्यादिति तथाच कठादिभिर्यत्नाध्ययनमात्रेण संज्ञा ... इति भावः । ... अध्येतृणामानन्त्येन संज्ञाया अनन्तत्वापत्तिरिति भावः । ... वैदिकीनामुक्ता ... अतीन्द्रिय ... प्रवृत्तिः ... अस्मदादिभिः ... लौकिकीनामप्युपपदिति । तथाच एतदनुमानेन ... वेदशाखानां कठ ... इति भावः । ... अतीन्द्रियार्थदर्शिपर मेश्वरसिद्धिरिति भावः ॥ १६ ॥

तुल्ये इत्यादि । ... श्रुति ... नीति ... आलाप ... सदा ... ॥

किन्तु प्रस्तुतविप्रतीपविधयोऽप्युच्चैर्भवच्चिन्तका
काले कारुणिक त्वयैव कृपया ते तारणीया नरा ॥१७॥

इतिशब्द स्वरूपे एवशब्द प्रकारार्थं मैत्रसार लोष्टमति कठिनमिल्ला वा। प्रस्तुते ईश्वरे विप्रतीपविधय प्रतिकूलपरा ताहृशा अपि उच्चैरतिशयेन काले भवच्चिन्तका, यद्वा कालकशून्या कार्य्या ॥ १७ ॥

अस्माकन्तु निसर्गसुन्दर चिराच्चेतो निमग्न त्वयी-
त्यद्धानन्दनिधौ तथापि तरल नाद्यापि सन्तृप्यते ।
तन्नाथ त्वरित विधेहि करुणा येन त्वदेकाग्रता
याते चेतसि नाप्नुवाम शतशो याम्या पुनर्यातना ॥१८॥

आदिग्यानादपि मूढतम् इति बहुवचननिर्देश तैजने आचान्तिते ईश्वरविषयक विप्रतिपत्तिनिराकीन ग्रहीकने हृदये धन न दयाजि विषयगोचरी न भवति ते विप्रतिपन्ना मैत्रसारामत पाषाणकल्पा लोष्टकल्पा वा सर्वेषां मुक्तिमभिप्रयाय छिन्तिति प्रस्तुत विप्रतीपविषय प्रस्तुते परमेश्वरे विप्रतीपविषय प्रतिकूलपरा कुतर्काभ्यासपरा कालै तौ सन्यायाम् उच्च अतिशयेन भवच्चिन्तका सन्त त्वयव तारणीया स्वविषयकार्यमयस्य कालकरहिता कार्य्या इति अनुमिताय ॥ १७ ॥

अस्माकं वा याता इत्यादि अस्माकन्तिति हे निसर्गसुन्दर स्वभावसुन्दर अस्माकं चेत यद्यपि त्वयि निमग्न शुद्ध-आनन्दनिधौ विनिश्चयात्मकम् इत्यता इति शुद्ध तथापि स्वाभाविक विना तरलं चल तथापि न सन्तृप्यते स्वयं तम न भवति यदि मनीषादिषु द त्वयि निमग्नत्वाद् चत चित्त अवहितिति इत्यत न विच्छिन्नत इत्यर्थ । हे नाथ त्वरितं करुणां विधेहि येन करुणाविधानेन चेतसि अवैकाग्रता अविचलत ध्यानानुसारसमकता याते प्राप्ते शतशः याम्या यमसम्बन्धिनी पुनर्यातनाः नरकयातना पुनर्नाप्नुयाम इत्यर्थः प्रार्थितमस्माभिरिति अनुमिताय ॥ १८ ॥

यथा तत्त्वं, सम्बुध्यत इति कर्मकर्त्तरि।

इत्येष नीतिकुसुमाञ्जलिरुज्ज्वलश्री-
र्यद्वासयेदपि च दक्षिण-वामकौ द्वौ।
नो वा, ततः किममरेशगुरोर्गुरुस्तु
प्रीतोऽस्त्वनेन पदपीठसमर्पणेन ॥ १९ ॥

इति पञ्चमः स्तवकः।

नो वासयेत्ततः किमस्माकम्।

इति श्रीहरिदासभट्टाचार्यविरचितकुसुमाञ्जलिकारिका-
व्याख्यानं समाप्तम्।

इत्येष इत्यादि, इति समाप्तौ, एष उज्ज्वलश्री नीतिकुसुमाञ्जलि न्यायकुसुमाञ्जलि दक्षिण-वामकौ द्वौ प्रतिकूलानुकूलौ सुजनदुर्जनावपि यावत्, यत् वासयेत् अनुरञ्जयेत्, अपि च किञ्च नो वा वासयेत् नानुरञ्जयेत्, तत किं तस्मात् अस्माकं किं, किन्तु अमरेश इन्द्र तस्य गुरु बृहस्पति तस्य गुरु उपदेष्टा परमेश्वर पदपीठसमर्पणेन पदमेव पीठं तत समर्पणं तस्य तथाविधेन अनेन न्यायकुसुमाञ्जलिना प्रीतोऽस्तु इति समुदितार्थः ॥ १९॥

इति महामहोपाध्याय—श्रीकामाख्यानाथतर्कवागीशविरचितायां कुसुमाञ्जलिव्याख्याविवृतौ
पञ्चमस्तवकव्याख्याविवृतिः समाप्ता।

सम्पूर्णा चेयं कुसुमाञ्जलिव्याख्याविवृतिः।

शुभमस्तु।